यथा महार्णवे पूर्णतत्सत्तामात्रसिद्धापरिच्छिन्नजलवलयानां पङ्क्तिरियर्त्यः । तस्मात् दृश्यमात्रस्य वाचारंभणस्य अनृतत्वात् प्रत्यगेवासंपूर्णं ब्रह्मैवाविकृतं सदास्ते इति सिद्धम् ।

Colophon :

इति श्रीमत्परमहंस परिव्राजकाचार्यश्रीमत्सर्वज्ञसरस्वतीपूज्यपाद शिष्यश्रीरामचन्द्रसरस्वतीपूज्यपादशिष्यश्रीमद्गङ्गाधरेन्द्रसरस्वतीपूज्यपादशिष्येण श्रीमदानन्दबोधेन्द्रसरस्वत्याख्यभिक्षुणा विरचिते श्रीवसिष्ठतात्पर्यप्रकाशे उत्पत्तिप्रकरणे द्वाविंशत्युत्तरशततमः सर्गः ।

उत्पत्तिप्रकरणं संपूर्णम् ।

D. No. 17834.

Pages, 66. Lines, 6 on a page. Telugu. Injured. Extent, 1,188 granthas.

शिवधर्मः ।

ŚIVADHARMAḤ.

Begins of fol. 140 (*a*) of the manuscript described under D. No. 2325.

Complete in 12 Adhyāyas.

Sāme work as that described under R. No. 2442 (*a*).

D. No. 17835.

Pages, 22. Lines, 9 to 15 on a page. Kannaḍa. Injured. Extent, 1,000 granthas.

आनन्दकाननमाहात्म्यम् ।

ĀNANDAKĀNANAMĀHĀTMYAM.

Begins on fol. 55 (*a*) of the manuscript described under D. No. 1952, wherein this work has been mentioned as Lakṣmīsaṁhitā in the list of the other works.

Incomplete.

Contains Adhyāyas 1 to 9 complete. 10th incomplete.

This is a portion of the Lakṣmīsaṁhitā of Vāyupurāṇa.

This treats of the holiness and greatness of Ānandakānana or Benares and is said to have been related to Saunaka by Sūta.

Beginning

शौनक उवाच—

सूत सूत महाप्राज्ञ दैवज्ञ वदतां वर ।
रहस्यं श्रोतुमिच्छामि श्रीमदानन्दकाननम्
केचिद्वदन्ति कल्याणं विष्णोरायतनं महान् ।
अपरे शैवमित्येतच्छिन्धि न· संशयं सताम् ॥

सूतः—

शृणु ब्रह्मर्षिवर्याथ रहस्यं पापनाशनम् ।
गुह्याद्गुह्यतरं विष्णोः क्षेत्रं विष्णुजनप्रियम् ॥

अयमेव पुरा प्रश्न· कृतः पाराशराग्रतः ।
पैलादिभिर्मुनिगणै रंभु हंसैश्च योगिभिः (?) ॥

Colophon :

इति वायुपुराणे लक्ष्मीसंहितायां आनन्दकाननमाहात्म्ये नवमोऽध्यायः ।

End :

नाभितीर्थमिदं प्रोक्तं ब्रह्मनाले जगत्पतिः ।
पद्मनाभस्वरूपेण निवसामि मुनीश्वर ।
ततो भगीरथे तीर्थे निवसामि त्रिविक्रम ।
स्वर्गद्वारेषु तत्पूर्वं सुरतीर्थे महोदधेः ।
कामधेनुखुरैः क्षुण्णे सुरभ्या · · · · · ॥

D. No. 17836.

Pages, 5. Lines, 6. on a page. Kannaḍa. Slightly injured. Extent, 60 granthas.

ककुद्गिरिमाहात्म्यम् ।

KAKUDGIRIMĀHĀTMYAM.

Begins on fol. 61 (*a*) of the manuscript described under D. No. 2492, wherein this work has been mentioned as Bhaviṣyottara purāṇi an the list of other works.

This work deals with the Māhātmya of Kakudgiri or Mount Kakut. In the Kali age the eight Mounts in the eight directions (दिक्) are said to have the power of purifying sins. Anyone who reads or hears this, will be washed off his sins.

This Kukudgiri Māhātmya is the II Chapter in the dialogue between Īsvara and Agastya as found in the Thīrtha Kāṇḍa of Sri Bhaviṣyothara purāṇa.

Complete.

Beginning :

श्रीसूतः—

ककुद्गिरिवरस्यास्य परितः पृथिवीसुराः ।
अद्रयश्चाष्टविख्याताः कलौ पापौघहारकाः ॥
तेषां वै नामधेयानि प्रवक्ष्यामि समासतः ।
नीलकण्ठाद्रिरैन्द्रीये भैरवाद्रिर्हुताशने ।
याम्ये तु वीरदुर्गाद्रिः शार्दूलाद्रिश्च नैरृते ॥
पश्चिमे तु कदंबाद्रिः. सुवर्णाद्रिः समीरणे ।
सिंहाद्रिर्हेमतुङ्गाद्रिरुदीच्यां तु नगद्वयम् ॥
पूर्वाद्रिर्वृषभाद्रि(श्च) अष्टादिक्षु निषेवितः ।

End :

इदं यः शृणुयान्नित्यं श्रावयेद्वा समाहितः ।
सर्वपापाविनिर्मुक्तो रुद्रलोके महीयते ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे तीर्थकाण्डे ईश्वरागस्त्यसंवादे ककुद्गिरिमाहात्म्ये द्वितीयोऽध्यायः ।

D. No. 17837.

Pages, 9. Lines, 7 on a page. Devanāgari. Good. Extent, 70 granthas.

सज्जनचित्तवल्लभः by मल्लिसेनः ।

SAJJANACITTAVALLABHAḤ by Mallisena.

Begins on fol. 20 (*b*) of the manuscript described under D. No. 9424.

Complete

Same work as that described under D. No. 5184.

D. No. 17838.

Pages, 66. Lines, 9 on a page. Devanāgari. Good. Extent, 670 granthas.

मानसोल्लासप्रकटीभावः by शङ्कराश्रमः ।

MĀNASOLLĀSAPRAKAṬĪBHĀVAḤ by Śaṅkarāśrama.

Begins on fol. 9 (*a*) of the manuscript described under D. No. 13937.

A poem in ten Ullāsas in which a sage is described as having sent Vāyu as a messenger to God Śiva.

Beginning :

श्रीविश्वनाथ करुणाकर विश्वमूर्ते
संभावयामि तव पादयुगं प्रणम्य ।
रामेश्वरं यतिवरं गुरुमप्रमेयं
नत्वा चकार चरितं परमेशधाम्न· ॥

अथ दुःखपङ्कनिमग्नजगदन्तःपाती कश्चिद्यतिवरः वायुं दूतत्वेन परिकल्प्याह—

अविश्रान्तो दूरात्पुनरुपगतो हन्त मलया-
न्ममैतस्मिन् स्थाने वस पवन विश्रम्य गतिमन् ।
ममाप्येतद्वाक्यं श्रवणरमणीयं श्रृणु सखे
ह्यनन्तं गौरीशं प्रति कथय सर्वत्र गतिमन् ॥

बाल्यपौगण्डयौवनस्थाविराद्यवस्थासु तापत्रयतापिताद्युत्तरसप्ततिसहस्र-संख्याकरोगायतनं श्वसृगालाद्युपभोग्याहंममेत्यभिमानवति शरीरे अनादि-पतितोऽस्मि भवत्कृपाविलोकनेन विना कारागृहान्निर्गमो न भवेदिति विलोकयेति वद ।

अन्यच्च—

आशया निपतितोऽस्मि सागरे
तत्र पञ्चविषयैर्भुजङ्गमैः ।
दंशितः पतितवान् ननु मूर्च्छया
मोचयेति वद राजशिरोमणिम् ॥

तत्र वायुराह—कस्त्वं मशकतुल्यगणेषु गणितस्यादेशः । गौरी-
शानन्दघने कथनायोग्यः । न लज्जसे मां कथयितुम् ।

सखे सत्यमुक्तं भवता, तथापि—

व्यसनासक्तटिट्टिभ्या सागरः शोषितः परः ।
ध्रुवोऽक्षयपदं प्राप उपमन्युः पयोनिधिम् ॥

सत्यमुक्तं त्वया परन्तु शिवलोके सरूपतादिमोक्षं प्राप्तानां शिव-
समानरूपाणां मध्ये कः शिव इति न ज्ञायते मया यस्मात्तव कार्यं
भवेत् ।

तत्राह यतिः—

आचार्येणोपदिष्टं द्वेधारूपं शिवस्यासीत् ।
पश्चास्य इन्दुभूष अर्धाङ्गे भूषिताः सदा दाराः ॥
सच्चिद्घन आनन्दो मायातीतो निरञ्जनः पुरुषः ।
एवं द्वेधारूपं प्रसाधितं वेदसिद्धान्तैः ॥

Colophon:

इति प्रथमोल्लासः ।

। विरहगौरववर्णनाय प्रथमतः पीठिकां रचयति ।

सदा शिवमनाः सदाशिव शिवेति वक्ता सदा
शिवस्य परिचर्यया भवति तोषबुद्धिः सदा ।
तथापि रजताचले विभवमन्दिरे शङ्करं
प्रपूजयितुमागतो ह्यचलबुद्धिलङ्केश्वरः ॥

तत्रैव चागत्य शिवौ प्रपूज्य
गौरीमुखं पश्यति हास्ययुक्तम् ।
शिवं ययाचे ह्यनया समानां
मां देहि भक्तप्रिय शङ्कर त्वम् ॥

शिवेन चोक्तस्त्वनया च तुल्या
नास्त्येव सत्यं भवति प्रसिद्धम् ।
इयं च देया मम तोषहेतो-
र्देह्येति श्रुत्वा जगृहे जगाम ॥

नन्दिकेश्वर उवाच—

मातृहीना वयं जाताः स्वस्त्रीदानेन सुव्रत ।
इतःपरं वर्णयाम औदार्यं श्रीमतां हि किम् ॥

End :

गङ्गाद्वारेण गतवान् कैलासं प्रति शङ्करः ।
देवकार्यमिदं कृत्वा स्वे महिम्नि विराजितः ॥

Colophon :

इति दशमोल्लासः ।

वदन्तु बहवो जनाः स्वयमनेन बुद्ध्या स्तवः
कृतोऽतिरुचिरः परं त्वविदुषां मनीषा त्वियम् ।
परं तु हृदि संश्रितः परशिवो यथेच्छं करो-
त्यहर्निशमसौ पुमान् भवति पारतन्त्र्ये वशः ॥

स्पर्शसंसृष्टलोहेन सुवर्णत्वं यथाप्यते ।
तथा शिवत्वं प्राप्स्यामि मनोवागर्पणेन च ॥
अयं हि वाक्यसन्दर्भः पुष्पमाला समर्पिता ।
गौरीशङ्करयोः कण्ठे दण्डवत्तु पपात ह ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यचैतन्याश्रमशिष्यरामेश्वराश्रमयातिसिंहाशिष्यशङ्कराश्रमबुद्धौ परमेश्वरप्रेरितमानसोल्लासप्रकटीभावः समाप्तः ।

D. No. 17839.

Pages 2. Lines, 15 on a page. Grantha. Injured. Extent, 18 granthas.

रुक्मिणीसन्देशश्लोकाः ।

RUKMIṆĪSANDEŚAŚLOKĀḤ

Begins on fol. 9 (*b*) of the manuscript described under D. No. 2380.

Incomplete.

This is a portion of Bhāgavata.

Beginning :

श्रुत्वा गुणान् भुवनसुन्दर शृण्वतां ते
निर्विश्य कर्णविवरैर्हरतोऽङ्गतापम् ।
रूपं दृशां दृशिमतामखिलार्थलाभं
त्वय्यच्युताविशति चित्तमपत्रपं मे ॥

End :

इत्येते गुह्यसन्देशा यदुदेव मयाहृताः ।
विमृश्य कर्तुं यच्चात्र क्रियतां तदनन्तरम् ॥

Colophon :

इति श्रीमद्भागवते दशमस्कन्धे द्विपञ्चाशोऽध्यायः ।

End :

श्रीशुकः—

वैदर्भ्याः स तु सन्देशं निशम्य यदुनन्दनः ।
प्रगृह्य पाणिना पाणिं प्रहसन् द्विजमब्रवीत् ॥

D. No. 17840.

Pages, 15. Lines, 15 to 17 on a page. Grantha. Injured. Extent, 150 granthas.

गजेन्द्रमोक्षणम् ।

GAJENDRAMOKṢAṆAM.

Begins on fol. 22 (*a*) of the manuscript described under D. No. 2380.

Complete.

This is a portion of Bhāgavata.

Same work as that described under D. No. 2400.

D. No. 17841.

Pages, 3. Lines, 16 on a page. Grantha. Injured. Extent, 22 granthas.

भ्रमरगीता ।

BHRAMARAGĪTĀ.

Begins on fol. 29 (*a*) of the manuscript described under D. No. 2380.

Complete.

Same work as that described under R. No. 3556.

D. No. 17842.

Pages, 13. Lines, 16 on a page, Grantha. Injured. Extent, 130 granthas.

सन्ध्यावन्दनमन्त्रः ।

SANDHYĀVANDANAMANTRAḤ.

Begins on fol. 42 (*b*) of the manuscript described under D. No. 2380.

Complete.

This is for the followers of the *Āpastambasūtra*.

Similar to the work described under D. No. 2874.

Beginning :

ओं केशवाय नमः । ओं नारायणाय नमः । ओं माधवाय नमः ।

* * * *

प्राणानायम्य ओं भूः । ओं भुवः । ओं सुवः । ओं महः । ओं जनः । ओं तपः । ओं सत्यं । ओं तत्सवितुर्वरेणीयं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात् ।

End :

शंखचक्रगदापाणे द्वारकानिलयाच्युत ।
गोविन्दपुण्डरीकाक्ष रक्ष मां शरणं गतम् ।
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

प्रणम्य अभिवादये ।

Fol. 56 (*a*) contains Kṛṣṇakarṇāmṛtaślokas.

D. No. 17843.

Pages, 3. Lines, 17 on a page. Grantha. Injured. Extent, 26 granthas.

दर्शतर्पणविधिः ।

DARŚATARPAṆAVIDHIḤ.

Begins on fol. 40 (*c*) of the manuscript described under D. No. 2380.

Incomplete. Wants end.

Same work as that described under D. No. 3632 but with the addition of the following stanzas at the beginning.

Beginning :

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहि ।
वृणीमहि च तत्राद्यौ दंपती जगतां पती ॥
श्रीमन्नभीष्टवरद त्वामस्मि शरणं गतः ।
स्वशेषभूतेन मया स्वीयैः सर्वपरिच्छदैः ॥
विधातुं प्रियमात्मानं देवः प्रक्रमते स्वयम् ।

D. No. 17844.

Pages, 3. Lines, 16 on a page. Grantha. Injured. Extent, 20 granthas.

शुकस्तुतिः ।

ŚUKASTUTIḤ.

Begins on fol. 34 (*b*) of the manuscript described under D. No. 2380.

Incomplete.

This is a portion of the Bhāgavata.

Same work as that described under D. No. 10537.

D. No. 17845.

Pages, 5. Lines, 16 on a page. Grantha. Injured. Extent, 35 granthas.

मुचुकुन्दोपाख्यानम् ।

MUCUKUNDOPĀKHYĀNAM.

Begins on fol. 36 (*a*) of the manuscript described under D. No. 2380.

Incomplete.

A small portion (51st adhyāya) of Śrimad Bhāgavata. This describes the story of Mucukunda.

Beginning :

मुचुकुन्दस्य श्रीकृष्णसन्दर्शनादिकथाप्रारंभघट्टः ।

श्रीशुकः—

तं विलोक्य विनिष्क्रान्तमुज्जिहानमिवोडुपम् ।
दर्शनीयतमं श्यामं पीतकौशेयवाससम् ॥
श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ।
पृथुदीर्घचतुर्बाहुं नवं कञ्जारुणेक्षणम् ॥

End:

सोऽपि भस्मीकृतो नूनमात्मीयेनैव पाप्मना ।
अनन्तरं भवान् श्रीमान् लक्षितोऽमित्रशासनः ॥ ३३ ॥

तेजसा तेऽविषह्येण भूरि द्रष्टुं न शक्नुमः ।
ततो वै त्वं महाभाग माननीयोऽसि देहिनाम् ॥ ३४ ॥

Fol. 37 contains Meṣasaṅkrāntitarpaṇamantraḥ.

D. No. 17846.

Pages, 6, Lines, 12 on a page. Grantha. Injured. Extent, 30 granthas.

यक्षप्रश्नः ।

YAKṢAPRAŚNAḤ.

Begins on fol. 62 (*a*) of the manuscript described under D. No. 2380.

Same work as that described under D. No. 17600.

D. No. 17847.

Paper. 9¾ × 4 inches. Pages, 271. Lines, 9 to 14 on a page. Telugu. Good. Old. Extent. 3,658 grantnas.

कृष्णकर्णामृतम् लीलाशुकः with व्याख्यानम्—सुवर्णचषकम् by पापयल्लय-सूरि ।

KṚṢṆAKARṆĀMṚTAM by Līlāśuka with vyākhānam Suvarṇa-caṣakam by Pāpayallayasūri.

Complete.

Same work as that described under D. No. 9893.

Foll. 38 (*b*), 39 (*a*), 86 (*b*), 87 (*a*) are left blank.

D. No. 17848.

Pages, 97. Lines, 24 on a page. Grantha. Extent, 1,400, granthas.

तर्कचन्द्रिका by कृष्णभट्ट ।

TARKACANDRIKĀ by Krsnabhatta.

Begins on fol. 66 (*a*) of the manuscript described under D. No. 4932.

Breaks off in Pañcasandhiprakaraṇa.

A grammatical treatise based on the sūtras of Pāṇini, like Siddhānta kaumudi by Kṛṣṇabhaṭṭa, the son of Raghunātha and the grandson of Govardhana of Maunikula.

Beginning :

नत्वा स्वीयपितामहं बुधवरं गोवर्धनं भक्तितो
नत्वा श्रीरघुनाथतातंचरणौ श्रीजानकीमातरम् ।
ध्यात्वा व्यासपदांबुजं हृदि चिरं श्रीकृष्णभट्टाभिधो
मौनी सन्तनुते सतां सुखकरीं तर्कादिकां चन्द्रिकाम् ॥

अइउण्—

अत्र संहिताया अविवक्षणात् । प्रगृह्यत्वे प्रकृतिभावाद्वा सन्धिर्न भवति । स्वरसन्धिस्तु न भवति । वर्णोपदेशकाले अजादीनामनिष्पादाद्िति कैयटः । नवीनास्तु—तच्चिन्त्यं—वर्णोपदेशकाले इत्संज्ञायामच्प्रत्याहारे च निष्पन्ने प्रवर्त्तमानानामपि यणादीनां सुध्युपास्य इत्यादौ तटस्थ इव उद्देश्यतावच्छेदकाक्रान्ते वर्णोपदेशादावपि प्रवृत्तेर्दुर्वारत्वात् । अन्यथा तुल्यास्येत्यादौ सवर्णदीर्घो न स्यादित्याहुः ।

अत्रेयं चिन्ता—

* * * * *

तस्मात् धातुग्रहणानुवृत्तिपक्षे हिरूगिति । तत्पक्षे तु शिश्ये इति प्रत्युदाहरणं बोध्यम् ।

Colophon :

इति संज्ञाप्रकरणम् ।

End :

किञ्चाशुग्रहणाभावे कार्यकालपक्षे परनिमित्तत्वाभावेन यत्वस्यान्तरङ्गत्वाद् बहिरंगपरिभाषया विसर्जनीयस्यासिद्धत्वात् यत्वं स्यात् । यदि तु हलोऽनन्तराःसंयोग इति निर्देशादत्र यत्वं निवार्यते तर्हि उत्तरार्थमेव अशुग्रहणम् ।

एवं च स्थान्यवृत्तिधर्माश्रयस्थानिसंबन्ध्यवृत्तिधर्माश्रये च नेत्यर्थ इति व्याख्यानं फलाभावादप्ययुक्तमिति दिक् ।

Colophon :

इति श्रीमन्मौनिकुलतिलकायमानगोवर्धनभट्टात्मजरघुनाथभट्टसुत श्रीकृष्ण भट्टविरचितायां तर्कचन्द्रिकायां पञ्च(म ?) सन्धिप्रकरणं समाप्तिमगमत् ।

D. No. 17849.

Pages, 24. Lines, 17 on a page. Telugu. Injured. Extent, 270 granthas.

सूर्यशतकम् (मयूरशतकम्) by मयूर ।

SŪRYAŚATAKAM (MAYŪRAŚATAKAM) by Mayūra.

Begins on fol. 349 (*a*) of the manuscript described under D. No. 11886.

Complete.

Same work as that described under D. No. 11316, but see for the beginning in R. No. 139 (*b*).

D. No. 17850.

Pages, 204. Lines, 23 to 25 on a page, Telugu. Good. Extent, 2,600 granthas.

कच्छपुटतन्त्रम् by नागार्जुनः ।

KACCHAPUṬATANTRAM by Nāgārjuna.

Begins on fol. 226 (*a*) of the manuscript described under D. No. 3895.

Contains 1 to 23 patalas complete.

Same work as that described under D. No. 7778.

D. No. 17851.

Pages, 44. Lines, 28 on a page. Telugu. Good. Extent, 660 granthas.

भूततन्त्रम् ।

BHŪTATANTRAM.

Begins on fol. 234 (*a*) of the manuscript described under D. No. 3895, wherein this work has been mentioned as Bhairavatantra in the list of other works given therein.

Contains 1 to 17 Paṭalas complete.

Same work as that described under D. No. 7990.

D. No. 17852.

Pages, 19. Lines, 18 to 21 on a page. Telugu. Slightly injured. Extent, 228 granthas.

सन्न्यासविधिः ।

SANNYĀSAVIDHIḤ.

Begins on fol. 294 (*b*) of the manuscript described under D. No. 237.

Complete.

Similar to the work described under R. No. 154.

Beginning :

आसन्ने सङ्कटे घोरे चोरव्याधिषु गोचरे ।
घये(भय)प्राप्तस्य सन्न्यासः कर्तव्यो मनुरब्रवीत् ॥

आतुराणां विशेषोऽस्ति न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य सन्न्यासं तत्र पूरयेत् ।

सन्न्यस्तमिति यो ब्रूयात् प्राणैः कण्ठगतैरपि ।
स भित्वा मण्डलं भानोः परं ब्रह्माधिगच्छति ॥

सन्न्यसन्तं द्विजं दृष्ट्वा स्थानाच्चलति भास्करः ।
एष मे मण्डलं भित्वा यास्यन्ति? परमं पदम् ॥

अत्यातुरश्चेत् प्रैषमात्रमुच्चरेत् । तदनन्तरं यदि जीवन्नपि शरीरस्वास्थ्यपर्यन्तं प्रणवेनैवानुष्ठानादिकं कृत्वा सदा प्रणवजपं कृत्वा शरीरस्वास्थ्यानन्तरं गुरूसमीपं गत्वा तत्र महावाक्यप्रणवाद्युपदेशं प्राप्य गुरूपादिष्टमार्गेण यतिभेदानाचरेत् ।

End :

आनन्दमानन्दकरं प्रसन्नं
ज्ञानस्वरूपं निजबोधयुक्तम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं
श्रीमद्गुरूं नित्यमहं नमामि ॥

Colophon :

। इति सन्न्यासविधिप्रकरणमाराधनान्तं संपूर्णम् ।

D. No. 17853.

Pages, 3. Lines, 4, 5 on a page. Telugu. Injured. Extent, 17 granthas.

ब्रह्मकुण्डिकाष्टकम् ।
BRAHAMAKUNḌIKĀṢṬAKAM.

Begins on fol. 66 (*a*) of the manuscript described under D. No. 2114, wherein this work has been mentioned as manīṣāpañcaka in the list of the other works given therein.

Complete.

Eight stanzas in praise of Brahmakuṇḍi, a sacred spring near Badarikaśrama.

Beginning :

स्थित्वा यद्वारिपूर्वं द्रुहिणकरलसद्धेमकुंभान्तराले
कृत्वा बल्यन्तरायं प्रति कपटतनोर्वामनस्याङ्घ्रिसङ्गम् ।
गत्वा पश्चाच्छिवस्योल्लसदुडुपमिलन्मौलिभागं वरिष्ठं
भूत्वा तद्ब्रह्मकुण्डीत्यजसरिदमला चावनौ सिन्धुमाप ॥

सूतः—

मत्वा मद्वाक्यमेतद्भवदघहरणे सत्यमित्येव यूयं
पश्यध्वं ब्रह्मकुण्डीतटयुगमधुना भ्राजदंभोजयुक्तम् ।
श्रुत्वैतत्सूतवक्त्रान्मधुरसभरितं श्राव्यमानन्दकन्दं
ते सद्यस्तुष्टुवुस्तामपहृतकलुषां कुण्डिकां पापदण्डाम् ॥

ऋषयः—

नमस्ते चतुर्वक्त्रकुण्डप्रभूते
नमस्ते चतुर्बाहुविष्ण्वंघ्रिपाते ।
नमस्ते चतुर्वेदसारात्मतोये
नमश्चारुतोये नमः कुण्डिके ते ।

End :

भवत्स्तोत्रमेतत्पठन्ति प्रभाते
-मुत्थाय श्लोकाष्टकं ब्रह्मकुण्डि ।
सुभुक्त्वैव भोगाननेकानिहस्थान्
ततस्तेऽमरत्वं त्वया प्राप्नुवन्ति ॥

D. No. 17854.

Pages 6, Lines, 8 on a page. Telugu. Injured. Extent, 110 granthas.

तल्पगिरिमाहात्म्यम् ।

TALPAGIRIMĀHĀTMYAM.

Begins on fol. 94 (*a*) of the manuscript described under **D.No. 2369.**

Incomplete.

Foll. 96 to 103 contain Svarṇamukharīmāhātmyam which is in disorder.

This professes to be a portion of Skāndapurāṇa and treats of the greatness and sanctity of Talpagiri, now called Nellore. This is introduced as a conversation between Sūta and Nārada.

Beginning :

याथार्थ्यमाप भुवि यद्भजनात् पिनाकी
तस्मात् पिनाकतटिनीति ततः श्रुताभूत् ।
तस्यां कृपातिशयतः सततं शयानं
वन्दे सुतल्पगिरिनाथमहर्निशं तम् ॥

भगवत्पादकमलसेवाकमलमानसाः ।
नैमिशारण्यमाश्रित्य किमकुर्वंस्तपोधनाः ॥

श्रीसूतः—

माहात्म्यं पुण्यतर्थीनां सत्सङ्गत्या प्रकाशितम् ।
तपोधनानां शान्तानां सुखेन समवर्तत ॥

ततः कदाचिच्छरदिन्दुसन्निभो
जडाकलापैः परिवीतविग्रहः ।
मूर्त्तीकृता भक्तिरिव श्रियःपते-
र्विशुद्धविज्ञानविशुद्धचन्द्रमाः ॥

परस्य पुंसोऽद्भुतचेष्टितानि
गायन् विपञ्चीनिनदैर्गुणौघान् ।
समाजगामाब्जभवः स नारदः
सूनुस्समाजं किल तत्र तेषाम् ॥

वेङ्कटाद्रेस्तथैशान्ये पञ्चयोजनमात्रतः ।
फणिराजगिरिर्नाम विष्णोरायतनं महत् ॥

तत्र विष्णुगिरेर्जाता नदी चोत्तरवाहिनी ।
नाम्ना पिनाकिनी नाम सर्वपापप्रणाशिनी ॥

तत्रास्ते शेषशयने पद्मनाभः श्रिया सह ।
पश्चिमाभिमुखं देवं नदी चोत्तरवाहिनी ॥

Colophon :

इति स्कान्दपुराणे वैष्णवसंहितायां क्षेत्रखण्डे तल्पगिरिमाहात्म्ये-द्वाशीतितमोऽध्यायः ।

End :

नारदः—

तीर्थयात्राप्रसंगेन प्राप्तोऽहं मलयाचलम् ।
जातः समीरणो यस्य चन्दनद्रुमकाननात् ॥

आह्लादयति चेतांसि जगत्त्राणपरायणः ।
उपत्यकायां प्राप्योच्चैर्महेन्द्रं नाम पर्वतम् ॥

अन्वतिष्ठन् महातेजा. काश्यपो मुनिसत्तमः ।

कटाक्षो यस्य भूतानां तापत्रयनिवारणः ।
तद्दिदृक्षयितुं ब्रह्मन् आगमान्तैकगोचरम् ॥

तपश्चचार धर्मात्मा दिव्यवर्षसहस्रकम् ।
सुप्रसादं मनो नास्य केशवान्नोपलब्धवान् ॥

D. No. 17855.

Palm leaf. 13 × 1½ inches. Pages, 52. Lines, 5 on a page. Nandinagari and Telugu Injured. Old. Extent, 500 granthas.

नरकासुरविजयः by धर्मसूरि ।

NARAKĀSURAVIJAYAḤ by Dharmasūri.

Same work as that described under R. No. 821 (*f*).

Leaves are broken in the beginning.

The Scribe adds:—

श्री श्रीपतिर्वीरणाःश्री
कोण्डुसोमसुतः सुतः ।
अलिखं नाटकं पैता-
महं व्यायोगसंज्ञकम् ॥

D. No. 17856.

Page, 3. Lines 5, on a page. Telugu. Good. Extent, 18 granthas.

गौलीपतनफलम् ।

GAULĪPATANAPHALAM.

Begins on fol. 45 (*a*) of the manuscript described under D.No. 1565.

Complete.

Similar to the work described under D. No. 13927.

Beginning :

कलहं शिरसि स्थाने ललाटे बन्धुदर्शनम् ।
भ्रूमध्ये राजसम्मानमुत्तरोष्ठे धनक्षयम् ॥
अधरोष्ठे धनैश्वर्यं नासान्त्ये व्याधिसंकुलम् ।
दीर्घायुर्दक्षिणे कर्णे बहुलाभं तदोत्तरे ॥

End :

अध्वानं दक्षिणे पादे वामपादे विनाशनम् ।
केशान्ते मरणं विद्यात् सर्वशास्त्रेषु सम्मतम् ॥

D. No. 17857.

Pages, 16. Lines, 5 on a page. Telugu. Slightly injured. Extent, 180 granthas.

भद्राचलरामचन्द्रस्तोत्रम् by पापनामात्यः ।

BHADRĀCALARĀMACANDRASTOTRAM by Pāpanāmātya.

Begins on fol. 34 (*a*) of the manuscript described under D. No. 11778, wherein this work has been mentioned as Rāmakīrtanastotra in the list of other works given therein.

Complete.

Similar to the work described under D. No. 10179.

Beginning :

श्रीमानिनीरमणनाभिसरोजजन्म-
संभूतमुख्यऋषयो बहवोऽपि सन्ति ।
तेषां मुनिर्हारितसस्तुमहत्तपस्वी
तन्मौनिवृन्दनुतपात्रचरित्रशीलः ॥

तस्य गोत्रस्य सञ्जातः शायमन्त्रीश्वरो भुवि ।
तस्य पुत्रो रामचन्द्रो मन्त्रिमार्ताण्डसन्नुतः ॥

रामचन्द्रप्रधानस्य पुत्रोऽभूत् पण्डितावनः ।
वेङ्कटकृष्णसाचिवो विद्यावान् कीर्तिमान् धनी ॥

सचिवाग्रसरो धीरो धर्मकीर्तिपरायणः ।

दशरथ इव सुमित्रोपेतः राम इव धर्मकुशलः इन्द्र इव सन्तानोपेतः कुबेर इव नरवाहनः शंभुरिव महाभूतसंपन्नो विष्णुरिव चक्रपाणिः शेष इव महाभोगी बृहस्पतिरिव सूक्ष्मधिषणोऽग्निरिव मेषारूढः सूर्य इवान्तर्विष्णुः ऐरावत इव विमलमूर्तिराञ्जनेय इव स्वामिकार्यधुरंधरो वेङ्कटकृष्णप्रधानश्चासीत् ।

पुत्रोऽभूत् पापनामात्यस्तस्यैव सुगुणाकरः ।
धीमान् श्रीमान् यशोयुक्तः प्राभवे विस्णुसान्निभः ।

सङ्कितातात्पर्यविलासबुद्धिमान
भद्राद्रिरामस्य महाप्रभावम् ।
ज्ञात्वा कवित्वं रचितं महात्मा
समारभेच्चित्रकवित्वतत्परः ॥

यावद्दिव्यस्थलं रम्यं भद्राद्रीश्वरमान्दिरम् ।
गानतालसमायुक्तमारभेद्भक्तितत्परः

श्रीमद्भद्राद्रिरामस्य दिव्यस्थलविराजिता ।
मञ्जरी नाम रचिता तेन पापनमन्त्रिणा ॥

* * * * *

प्रणम्य चावधारयेत्युक्त्वा चतुराननः स्तोत्रं विज्ञापयामास । श्लो--
रागं, वसन्तभैरवी—

आदितालम्—

श्रितकुवलयसोमो भूमिजाताभिरामो
दशवदनविरामश्चण्डमार्ताण्डधामा ।
जनकदुहितृवामो भूभृतां सार्वभौमः
प्रथनदनुजभीमः पातु भद्राद्रिरामः ॥

End :

रावणान्तकाय मङ्गलं बन्धुराजन्यभरणाय मङ्गलम् ।
पावनचरिताय मङ्गलं विश्वपालनचतुराय मङ्गलम् ॥

मङ्गळं जय मङ्गलं शुभमङ्गलं भवते ।

The Scribe adds—

आनन्दनाम संवत्सर माघशुद्धसप्तमी अप्पुगुडूरि रामन्न व्राशिन भद्राचलश्रीरामस्तोत्रं संपूर्णम् ।

D. No. 17858.

Pages, 12. Lines, 8, 9 on a page. Grantha. Slightly injured. Extent, 150 granthas.

रामायणव्याख्या ।

RĀMĀYAṆAVYĀKHYĀ.

Begins on fol. 63 (*a*) of the manuscript described under D. No. 11551.

Contains Sargas 11 to 25 in Sundarakāṇḍa and wants beginning and end.

Similar to the work described under D. No. 1877.

Beginning :

क्रकरान् क्रमणाख्यपक्षिविशेषान् । कृतनिष्ठान् पर्याप्तपक्वान् । युगपर्याप्तयोः कृतमित्यमरः । य[illegible] कृतेन हिङ्गुमरीचिजीरकादिसम्मेलनक्रियानिष्पन्नान् ।

Colophon :

एकादशः सर्गः ।

End :

यात्रा यानं सैन्यसंविधानं शत्रुनिरसनप्रकारश्च । यान · · विधम् ।
कामन्तः यानासने विग्रहस्य रूपं सद्भिः परं स्मृतम् ।

सन्धौ च सन्धिमार्गज्ञैः द्वैधीसावस · · · · · ।

D. No. 17859.

Pages, 3. Lines, 6 on a page. Grantha. Injured. Extent, 30 granthas.

सरससंवादः by घटिकाशतकविः ।

SARASASAMVĀDAḤ by Ghaṭikāśatakaviḥ.

Begins on fol. 52 (*a*) of the manuscript described under D. No. 12110.

Some erotic stanzas in tha style of conversation between Rangapati and his consort by Ghaṭikāśata kavi who may be identical with the Ghaṭikāśata Ammāl of Śrivatsagotra or Varadācārya, the son of Sudarśanacharya.

Complete.

Beginning :

देवस्य दैत्यमृगयोर्वनमेत्य रात्रिं
नीत्वा प्रभातसमये पुनरागतस्य ।
देव्याश्च तच्चिरविलंबनशङ्किताया:
संवाद एष सरसः श्रियमावहेद्वः ॥

देवी—

सख्यश्च पश्यत समाकुलकेशपाशं
वेषं विचित्रनखरक्षतविह्वलाङ्गम् ।
कृष्णस्य वञ्चयितुमेष कृतोद्यमो मां
गेहादितः परिजनेन निवारणीयः ॥

देवः—

देवि प्रसीद मयि धेहि कृपाकटाक्षं
किं त्वं प्रकुप्यसि मया [विहि] तोऽपराधः ।
यातोऽस्मि राक्षसवधाय वनं रजन्यां
तत्कण्टकैस्तव रुषे कृत एष वेषः ॥

End :

देवः—

पश्यन्ननन्यशरणः परितः स रागी
पादे पतन् परिजनाक्षिकृतोपदेशः ।
आलिङ्गितः पुलकिताननमाशु देव्या
हर्षं तरङ्गयतु रङ्गपतिः श्रियं नः ॥

Colophon :

इति घटिकाशतकविरचितः सरससंवादः समाप्तः ।

D. No. 17860.

Palm, leaf. $17\frac{5}{16} \times 1\frac{6}{16}$ inches. Pages, 20. Lines, 7. 8 on a page. Telugu. Good. Old. Extent, 280 granthas.

बालभागवतव्याख्या—सुधीचन्द्रिका by रामसूरि ।

BĀLABHĀGAVATAVYĀKHYĀ - SUDHĪCANDRIKĀ by Rāmasūri.

Incomplete.

Same work as that described under D. No. 12323.

D. No. 17861.

Peges, 9. Lines, 9 on a page. Grantha. Slightly injured. Extent, 168 granthas.

भिक्षाटनकाव्यम् by उत्प्रेक्षावल्लभ ।

BHIKṢĀṬANAKĀVYAM by Utprekṣāvallabha.

Begins on fol. 39 (*a*) of the manuscript described under D. No. 12314.

Incomplete.

Contains Padhhatis one to four complete and 5th incomplete.

Same work as that described under D. No. 11618.

The Prakaraṇas are given below :—

१ काव्यमुखपद्धतिः

२ मण्डनपद्धतिः

३ मण्डननिषेधपद्धतिः

४ निर्गमनपद्धतिः

Colophon :

इत्युत्प्रेक्षावल्लभकृतौ भिक्षाटने काव्यमुखपद्धतिः प्रथमः ।

D. No. 17862.

Pages, 5. Lines, 8 on a page. Telugu. Slightly injured. Extent, 90 granthas.

दक्षिणामूर्तिस्तोत्रम् ।

DAKṢIṆĀMŪRTISTOTRAM

Begins on fol. 137 (*a*) of the manuscript described under D. No. 12742.

Complete.

This is a portion of the Śivāpurāṇa.

Similar to the work described under D. No. 10979.

Beginning :

जैमिनिः—

मार्कण्डेय महायोगिन् सकलागमवित्तम ।
किं तत्स्तोत्रं परं ब्रह्मन् केन प्रोक्तं पुरातनम् ॥
येन तुष्टो भवेद्देवो दक्षिणामूर्तिरीश्वरः ।
तत्स्तोत्रं वद मे शीघ्रं भक्तानामुपकारकम् ॥

मार्कण्डेयः—

वक्ष्येऽहं दक्षिणामूर्तेः स्तोत्रमिष्टप्रदं शुभम् ।
पठनाच्छ्रवणाद्यस्य सर्वाभीष्टं प्रजायते ॥
इतः परं मया नोक्तं यस्य कस्याप्यनुत्तमम् ।
तव स्नेहात्प्रवक्ष्यामि शृणुष्वैकाग्रमानसः ॥
नमो रुद्राय शर्वाय दक्षिणामूर्तये नमः ।
शङ्कराय शशाङ्काय शाश्वताय शिवात्मने ॥

End :

देवेषु यो गुरुःश्रेष्ठस्तथा तस्य परं स्तवम् ।
पठतः शृण्वतः कोटिलिङ्गपूजाफलं भवेत् ।

रोगहिंसादिहिंसानां राक्षसानां च हिंसकम् ।
भूतप्रेतपिशाचादि दृष्टिमात्रेण दृश्यते ॥
आपत्स्वेतन्मुनिश्रेष्ठ वीणया पठ नित्यशः ।
नित्यं जप्त्वा स योगोक्त्या पूज्यो लोकेषु वै मुने ।

Colophon :

इति शिवपुराणे पञ्चसप्ततितमोऽध्यायः ।

D. No. 17863.

Pages, 56. Lines, 6 on a page. Telugu. Injured. Extent, 675 granthas.

वासवदत्ताव्याख्या—दर्पणम् by तिम्मयसूरि ।

VĀSAVADATTĀVYĀKHYĀ - DARPAṆAM by Timmayasūri.

Begins on fol. 206 (*a*) of the manuscript described under D. No. 11934, wherein this work has been mentioned as Nighaṇṭu viśeṣaḥ in the list of other works given therein.

Wants beginning and end.

Same work as that described under D. No. 12419.

Beginning :

गर्वश्च । कशिपुत्वं नामाच्छादनं द्वयमित्यमरः । वसुदेवोऽस्य जनकः स एवानकदुन्दुभिरित्यमरः । तस्य तर्पणं प्रीणनं, अन्यत्र वसुभिः देवानां प्रीणनं, यागः, सौकार्यं सुकरस्य भावः सुकरत्वं च, यशोदानन्दश्च पितरौ तयोः समृद्धिः ।

End :

खगेश्वरगोत्रः गरुडवंशः । संस्कारो वासना समे इति वैजयन्ती । घोष आभीरपल्ली स्या . . . . स्त्री नृ(कृ)त्यबहुलं स्त्रीसंज्ञकैः नृ(कृ) त्यसंज्ञकैश्च बहुलं स्त्रीभूतां नदिकां कृत्यैर्बहु . . . . .

D. No. 17864.

Paper, 10 × 4½ inches. Pages, 16. Lines, 12 on a page. Nandinagari. Good. Old. Extent, 228 granthas.

नैषधम् by श्रीहर्षः ।

NAIṢADHAM by Śriharṣa.

Contains Sarga 17 only complete.

Same work as that described under D. No. 11543.

D. No. 17865.

Pages, 14. Lines, 30 on a page. Telugu. Injured. Extent, 240 granthas.

महालक्ष्मीत्रिशतीनामस्तोत्रम् ।

MAHĀLAKṢMĪTRIŚATINĀMASTOTRAM.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 9114.

An enumeration of three hundred names of the goddess Mahālakṣmī the consort of Viṣṇu.

Complete.

Beginning :

विचित्रमणिसंयुक्ते झिल्लिकागणनादिते ।
हंसकारण्डवाकीर्णे दरीनिर्झरशोभिते ॥

चूतपुन्नागकुवलपनसार्जुनसंवृते ।
सिंहव्याघ्रवराहादिमृगयूथविराजिते ॥

नानाधातुसमाकीर्णे महर्षिगणसेविते ।
यक्षकिन्नरगन्धर्वमिथुनैश्च सुशोभिते ॥

रमणीये महत्पुण्ये सर्वक्लेशहरे शुभे ।
मन्दराद्रौ समासीनः सहस्राक्षः शचीपतिः ॥

देवसङ्घसमायुक्तश्चिन्ताव्याकुलमानसः ।
कदा शापाद्विमुक्तस्सन्नृषेर्दुर्वाससः कृतात् ॥

अहं स्वर्गं गमिष्यामि रिपूञ्जेष्याम्यहं कदा ।
राज्यच्युतिर्महत्यासीत् किं कार्यं राज्यहेतवे ॥

गतं तु वर्षसाहस्रं महत्या चिन्तया मम ।
उपायं नाधिगच्छामि किमतः करवाण्यहम् ॥

एवं चिन्तासमायुक्तो मनस्येवं विचिन्तयन् ।
जगत्प्राणं समाहूय प्रेषयामि गुरोर्गुहाम् ॥

* * * * *

जगन्मातुर्महालक्ष्म्या नाम्नां चैव शतत्रयम् ।
रहस्यातिरहस्यं च गोपनीयं प्रयत्नतः ॥

* * * * *

ओङ्कारपद्मसंस्पर्शशुद्धस्वान्तमनोहरा ।
ओङ्कारपूजनासक्तभक्तचित्तमनोहरा ।
ओङ्काररत्नखचितपञ्जरस्थमहाशुकी ।

* * * * *

ह्रीबीजजातसौभाग्यकलिकोज्वलवल्लिका ।

Colophon :

इति ह्राकाराद्यक्षरपञ्चदशनामानि पूर्णानि च त्रिशतमहालक्ष्मी-नामानि ।

End :

एवं भवति भो वज्रिन् श्रीलक्ष्मीवीक्षणाज्जनः ।
तस्मात्त्वमपि देवेश निःशङ्कं कुरु कीर्तिदम् ॥
किं पुनर्बहुनोक्तेन नालं वर्षशतैरपि ।
नानन सदृशं स्तोत्रं श्रीलक्ष्मीप्रीतिदायकम् ।
एतच्छ्रुत्वा सहस्राक्षो जगादान्तर्हितं वचः ।
सुधातुल्यानि नामानि तवो(त्वयो)क्तानि न संशयः ।
अतस्त्वं वाक्पतिरिति प्रोच्यते खलु दैवतैः ।
अहमेवं करिष्यामि गमिष्यामि सुरालयम् ॥
शत्रून् विध्वंसयिष्यामि पूजयिष्यामि सद्गुरून् ।
एवमुक्त्वा महातेजाः शक्रास्त्रिदशपुङ्गवः ॥
त्रिशतीनामपठनं भक्त्या चक्रे निरन्तरम् ।
तत्प्रभावाद्विनिर्जित्य शत्रुपक्षं महाबलः ॥
लब्ध्वा जयं गुरोः सार्धं निजलोकं शचीपतिः ॥

चतुर्दन्तादि सकलं प्राप्य हर्षसमन्वितः ।
सुसुखं पालयामास देवलोकं शतक्रतुः ॥

Colophon :

इति त्रिशतीनामस्तोत्रं संपूर्णम् ।

D. No. 17866.

Page, 1. Lines, 32 on a page. Telugu. Injured. Extent, 24 granthas.

आपस्तंबपरिभाषासूत्रम् ।

ĀPASTAMBAPARIBHĀṢĀSŪTRAM.

Begins on fol. 29 (*a*) of the manuscript described under D.No. 2913.

Incomplete.

Contains 1st Khaṇḍa and 22 Paribhāṣas in 2nd Khaṇḍa.

Same work as that described under D. No. 1059, but see D. No. 1045 for the beginning and end.

D. No. 17867.

Pages, 2. Lines, 14 on a page. Telugu. Injured, Extent, 15 granthas.

ह्रस्वदीर्घप्लुतमात्रालक्षणम् ।

HRASVADĪRGHAPLUTAMĀTRĀLAKṢAṆAM.

Begins on fol. 41 (*a*) of the manuscript described under D. No. 943.

Incomplete.

A treatise on the mātras (time or duration of pronunciation), etc of short, long and pluta vowels according to the Sāmaveda.

Beginning :

अथातो ह्रस्वदीर्घप्लुतमात्रा ह्यक्षराणि व्याख्यास्यामः । सामस्यार्धमात्र मार मात्रन्नम् (?) । ह्रस्वं मात्रादीर्घं द्वेस्वरं वृद्धं चेति त्रिमात्रमाभिधीयते ।

ह्रस्वं द्विमात्रसंयुक्तं प्लुतमाहुर्मनीषिणः ।
दीर्घन्तु मात्रासंयोगाद्द्वन्द्वमित्यभिधीयते ॥

End :

प्रत्युत्क्रामोऽष्टविधः । अतिस्वारो मंद्रो प्रत्युत्क्रामाति । परिस्वारे हि ससस कया सभ्यस्थाः सस इरा, न पपपव मन्द्रश्चतर्थं श्रायन्तेस्तरौभिः पुरः

D. No. 17868.

Pages, 11. Lines, 15 on a page. Telugu. injured. Extent, 112 granthas.

सहस्रनामभाष्योदाहृतौपनिषदवाक्यानि ।

SAHASRANĀMABHĀṢYODAHṚTAUPANIṢADAVĀKYĀNI.

Begins on fol. 7 (*a*) of the manuscript described under D. No. 4551.

Upanisadic references in the Sahasranama bhaṣya of Sankara-bhagavatpada.

Incomplete.

Beginning :

स एकं देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्वेताश्वतराणां मन्त्रोपनिषदि । सेयं देवतेत्यादे च्छान्दोग्ये । तत्सृष्ट्वा तदेवानुप्राविशत् इति तैत्तिरीयके ।

End :

अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इति श्रुतेः । ऋक्पावितं यो यजुषातिशान्तिमत्यामिध्वानि ध्वस्त समस्तपापम् । चक्रे जगत्पावन इति श्रुतेः ।

D. No. 17869.

Pages, 4. Lines, 19 on a page. Telugu. Slightly injured. Extent, 30 granthas.

नामलिङ्गानुशासनम् ।

NĀMALIṄGĀNUŚĀSANAM.

Begins on fol. 9 (*a*) of the manuscript described under D. No. 1503.

Incomplete.

Contains Avyayavarga only.

Gives also the Telugu meanings of words.

Same work as that described under D. No. 1620.

D. No. 17870.

Pages, 4. Lines, 24 on a page. Telugu. Slightly injured. Extent, 25 granthas.

सन्धिपदानि ।

SANDHIPADĀNI.

Begins on fol. 11 (*a*) of the manuscript described under D. No. 1503, wherein this work has been omitted to be mentioned in the list of other works given therein.

Complete.

An elementary explanatory treatise on Sanskrit Sandhis as dealt with by Pāṇini.

Beginning :

दण्ड + अग्रम् = दण्डाग्रम् । दधि + इह = दधीह ।
नदी + ईहति = नदीहति । भानु + उदय = भानूदयः ।
मधु + ऊहनम् = मधूहनम् । पितृ + ऋद्धिः = पितृद्धिः ।

Colophon :

इति हल् सन्धिः ।

End :

अघो, – भो – भो अघो ।

Colophon:

इति सन्धिपदाः (दानि) समाप्ताः (प्तानि) ।

Di No. 17871.

Pages, 5. Lines, 8 on a page. Telugu. Injured. Extent, 17 granthas.

नारायणाष्टाक्षरीमन्त्रः ।

NĀRĀYAṆĀṢṬĀKṢARĪMANTRAḤ.

Begins on fol. 33 (*a*) of the manuscript described under D. No. 497, wherein this work has been mentioned as Nārāyana mantra in the list of other works.

Complete.

Similar to the work described under D. No. 6493.

Beginning :

श्रीहरये नमः । श्रीवासुदेवाय नमः । प्राणायामम् । ओं नमो नारायणाय नमः । ओं विश्वाय नमः । शिरसि ओं नन्दतेजसाय नमः ।

नेत्रयोः ओं मीं प्राज्ञाय नमः । नासिकायां ओं नां, तुर्याय नमः । मुखे ओं रां आत्मने नमः । हृदये ओं यं अन्तरात्मने नमः । नाभौ ओं णां परमात्मने नम. । एवं अष्टाङ्गन्यासः ।

* * * * *

अस्य श्रीनारायणाष्टाक्षरमन्त्रस्य अन्तर्यामी ऋषिः शिरसि । देवी गायत्रीछन्दः मुखे । परमात्मा श्रीलक्ष्मीनारायणो देवता ।

End :

पुनः प्राणायामपूर्वकं न्यासाः । ध्यानश्लोकं पठित्वा, ओं नमो नारायणाय तर्पयाति ।

D. No. 17872.

Pages, 2. Lines, 12 on a page. Telugu. Injured. Extent, 9 granthas.

कृष्णषडक्षरीमन्त्रः ।

KRṢṆAṢAḌAKṢARĪMANTRAḤ.

Begins on fol. 35 (*a*) of the manuscript described under D. No. 497, wherein this work has been omitted to be mentioned in the list of other works.

Similar to the work described under D. No. 6106.

Complete.

Beginning :

अथ कृष्णषडक्षरमन्त्रं गुरुनमस्कारं एकादशस्थाने क्लीं कृष्णाय नमः ओं क्लीं कृष्णाय नमः । इति मन्त्रेण प्राणायामः । पूर्णज्ञानात्मने हृदयाय नमः ।

End :

श्रीकृष्णप्रीत्यर्थं कृष्णषडक्षरमन्त्रजपं करिष्ये । ओं क्लीं कृष्णाय नमः । ओं १०८ पूर्ववत् । उपसंहारं कृत्वा ओं क्लीं कृष्णं तर्पयामि (१२) श्रीवायुहनुमद्भीममध्वान्तर्गतश्रीरामकृष्णवेदव्यासात्मक-श्रीकृष्णार्पण(मस्तु) ।

D. No. 17873.

Pages, 2. Lines, 12 on a page. Telugu. Injured. Extent, 8 granthas.

ब्रह्मपारस्तोत्रम् ।

BRAHMAPĀRASTOTRAM.

Begins on fol. 37 (*b*) the manuscript described under D. No. 497, wherein this work has been omitted to be mentioned in the list of other works,

Complete.

Same work as that described under D. No. 9541.

Foll. 36 and 37 contain some stotrapadya.

D. No. 17874.

Pages, 13. Lines, 36 on a page. Telugu. Injured. Extent. 73 granthas.

वासुदेवपूजा ।

VĀSUDEVAPŪJĀ.

Begins on fol. 38 (*b*) of the manuscript described under D. No. 497.

Incomplete, wants end.

On the worship of Vāsudeva. The method, said in Tantrasāra is adopted herein.

Beginning :

शुभतिथौ मम हृत्कमलमध्यस्थितभारतीरमणमुख्यप्राणान्तर्गतश्रीलक्ष्मीनारायणप्रेरणया श्रीलक्ष्मीनारायणप्रीत्यर्थं ओं भगवतो बलेन भगवतो वीर्येण भगवतस्तेजसा भगवतःकर्मणा भगवतःश्रीवासुदेवस्य यथाशक्ति यथामति यथासंभवद्रव्येण तन्त्रसारोक्तप्रकारेण आवाहनादिषोडशोपचारपूजां करिष्ये ।

End :

ध्येयं सदा परिभवघ्नमभीष्टदं हि
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम् ॥

नारायणाय परिपूर्णगुणार्णवाय
अशिमवा रगुणवारिविरप्रमेय (?) ।
नारायणः परतमः परमः स एकः
संशान्तसंविदखिलं जठरे निधाय ।

लक्ष्मीभुजान्तरगतः स्वरतोऽपि चाग्रे
तस्योदरस्य जगतः सदमन्दसान्द्र ।
स्वानन्दतुष्टवपुषोऽपि रमारमस्य
भृत्यै निजाश्रितजनस्य हि सृज्य सृष्टिम् ।
वीक्षांबभूव वरनाम मनीषकान्ते
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मी-
र्धर्मिष्ठ आर्यवचसा यदगा . . . . (?)

D. No. 17875.

Paper. $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Pages, 16. Lines, 11 on a page. Devanāgarj. Good. Old. Extent, 240 granthas.

खण्डनग्रन्थः by चिद्रमणपतिः ।

KHAṆḌANAGRANTHAḤ by Cidramaṇapati.

Complete.

A treatise on poetics refuting the views of an another man and supporting his own veiws. This is by one Cidramaṇapati who is a disciple of Sivarāmapanta. Magha, Raghuvamsa and some other Kavyas are quoted herein. He mentions Bhottoji Diksita, Kaiyaṭa and others.

Beginning :

रमणपतिकराब्जकर्णिकायां
विहरतु पत्रमधुव्रतार्भकोऽयम् ।
वटकुसुमशरारिनामधेया-
ङ्कितनगरायतदीर्घिकावलग्ने ॥

मधुव्रतार्भक इति । पत्रमेव मधुव्रतार्भको भ्रमरबाल इत्यर्थे क्लीबपुमर्थाख्यानसमर्थयोः पत्रमधुव्रतार्भकपदयोर्विशेष्यविशेषणभावापत्तौ नामार्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति विभिन्नलिङ्गशब्दसमभिव्याहारा-भावः कारणमित्यादिव्युत्पत्तिभङ्गापत्तेः

* * * * *

एवं परोक्तीः सङ्खण्ड्य स्वोक्तिं व्यवस्थापयितुमारभते ।

End :

इति श्रीमन्महामहागुप्तपरब्रह्मपरब्रह्मविद्याद्यखिलविद्यापारङ्गमचरण-श्रीमद्दशपुत्रोपाभिधानपण्डिताधिराजश्रीशिवरामपन्ताभिधानपरगुरुचरणपरि-पूर्णकृपापूर्णतरीकृतेन चिद्रमणपतिनामकेन पण्डितेन विरचिते कस्य-चिदुक्तीनां खण्डने स्वोक्तिमण्डने चोत्कण्ठायाः परिपूर्णो विलासः । खण्डनग्रन्थः ।

The Scribe adds:—

खण्डनग्रन्थस्य इमानि पत्राणि विद्वांकुर्वन्तु सुधियो जनाः ।

D. No. 17876.

Pages, 430. Lines, 9 on a page. Devanāgari. Injured. Extent, 4,000 granthas.

रामनाममाहात्म्यम् by अच्युतानन्दः ।

RĀMANĀMAMĀHĀTMYAM by Acyutānanda.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 5956.

Incomplete.

Contains Prakaraṇas 1 to 33 complete 34th incomplete.

A treatise describing the greatness and the spiritual efficacy of repeating the name of Lord Sri Rāma by Acyutāśrama.

Beginning :

विदोषं चिद्गुणं चैव विद्रूपं त्वखिलं जगत् ।
कवीनां भाति यज्ज्ञानं तं विष्णुं नौमि चिद्गतम् ॥

यस्य स्मरणमात्रेण न मोहो नैव दुर्गतिः ।
न रोगा नैव दुःखानि तमनन्तं नमाम्यहम् ॥

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥

पूर्वं मन्वाद्यष्टादशस्मृतिषु मन्वादिभिः श्रीविष्णुनामजाप्यं पापकृतां प्रायश्चित्तं स्मृतम् ।

तत्र विष्णुराह—

तज्जाप्यजपनं ध्यानं तत्कथाश्रवणादिकम् ।
तदर्चनं च तन्नामकीर्तनं श्रवणादयः ॥
तच्छब्देनात्र प्रक्रान्तत्वाद्विष्णुरेवाभिधीयते ।

तथाच स्मृतिसंग्रहे—

स्तेनहिंसकयोः सख्यं कृत्वा च स्तेयहिंसने ।
प्रायश्चित्तं तत्र कुर्याज्जपेन्नामशतत्रयम् ॥

* * * *

इदानीं श्रोतॄन् प्रार्थयते—

अभिमानं परित्यज्य चेतसा शुद्धरूपिणा ।
शृण्वन्तु रामभद्रस्य नाममाहात्म्यमुत्तमम् ॥

इति श्रोतॄन् सम्मुखीकृत्य ग्रन्थानिर्विघ्नपरिसमाप्त्यर्थमिष्टदैवतं श्रीरामं नमस्करोति ॥

यं वेदाः स्मृतयः पुराणनिचयाः कल्पास्तथा संहिता
वेदव्यासशुकादिसर्वमुनयो यं संगिरन्तेऽनिशम् ।
योऽभूत्सर्वविशेषवज्जगदिदं भूत्वा स्वयं संस्थित-
स्तं विश्वेश हरिं विशेषरहितं श्रीरामभद्रं नुमः ॥

Colophon :

इति रामनाममाहात्म्ये श्रुतिस्मृतिपुराणेतिहासोक्ते अच्युताश्रमविरचिते प्रथमं प्रकरणम् ।

Colophon :

इति श्रीराममाहात्म्ये त्रयस्त्रिंशं प्रकरणम् ।

End :

शृणुध्वमृषयस्सर्वे भूयोभूयो वदाम्यहम् ।
हरिः श्रद्धावतां तुष्टो न धनैर्नच बान्धवैः ॥

अत एव—

धिग्जन्म भक्तिहीनानां देवदेवे जनार्दने ।
सत्पात्रदानशून्यं च तद्धनं धिक् पुनः पुनः ।
न नमेद्विष्णवे य . . . . . ।

D. No. 17877.

Pages, 4. Lines, 12 to 15 on a page. Grantha. Injured., Extent, 60 granthas.

श्रुतिगीता ।

ŚRUTIGĪTĀ.

Begins on fol. 216 (*a*) of the manuscript described under D. No. 5956.

Incomplete (almost complete).

Same work as that described under D. No. 2570.

D. No. 17878.

Pages, 160. Lines, 19 on a page. Telugu. Good. Extent, 2,560 granthas.

कादम्बरी ।

KĀDAMBARI.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 12033.

Incomplete (contains Uttarabhāga only).

Same work as that described under D. No. 13382.

D. No. 17879.

Pages, 32. Lines, 27 to 34 on a page. Devanāgari. Injured. Extent, 86 granthas.

साहित्यकण्टकोद्धारः ।

SĀHITYAKAṆṬAKODDHĀRAḤ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 12843.

Complete.

Same work as that described under R. Nos. 2321 and 2597.

Beginning :

संसारमरुसञ्चारतृषितानां शरीरिणाम् ।
सुधाकादम्बिनीभूतं तन्महस्समुपास्महे ॥

ध्यात्वा य मुनयो मनस्सरसिजे संसारपाथोनिधेः
पारं यान्ति जनुस्सुखानु(दि)कमहानकाहिभीमस्थितेः ।
तं क्षीराब्धिशयानमम्बुजदृशं लक्ष्मीसमेतं विना
कं देवं शिरसा नमामि सततं विघ्नौघविच्छित्तये ॥

उमावामकायं हताशेषमायं
खलानामपायं श्रितानामुपायम् ।
असन्नामधेयं महासामगेयं
सुरेशं गिरीशं महेशं तमीडे ।

* * * * *

साहित्यशास्त्रसरसीरुहसूर्यभूतौ
श्रीवत्सगोत्रकनकाचलसानुभूतौ ।
श्रीवैद्यशास्त्रकथने विजिताश्विनेयौ
कोनेरिविट्ठलबुधौ प्रणमामि नित्यम् ॥

यो नित्यं भुवि वैद्यशास्त्रविविधव्याख्यानदीक्षागुरुः
श्रीवत्सान्वयभूषणो यदभवत्तातस्तु नारा . . . . ।
. . . . यस्तूपतिव्रताविधमहाधर्माविधित्वं (धिपत्यं) गता
सोऽहं व्याकरणागमस्य सरसं सारं लिखाम्यद्भुतम् (?) ॥

ग्रन्थशिक्षाशतं (पदं) वीक्ष्य ग्रन्थिकानुपसेव्य च ।
साहित्यकण्ठकोद्धारं नाम ग्रन्थं करोम्यहम् ॥

End :

तं देशं विशति विभण्डकस्य सूनौ
सन्देशं बलमथनस्य संदधानः ।
पर्जन्यप्रकटमगर्वदंबरस्थे
त्वष्टारं तमभिननन्द पौरवर्गः (वृन्दम्) ।

इति उदारराघवे । अत्र वृषु सेचन इति धातोः ण्वुल्तृचाविति सूत्रेण तृचि कृते सेट्त्वात् "आर्धधातुकस्येड्वलादेरिति इट्प्राप्तेरिति चेत्—सत्यम् । प्रमाद एवायमित्येके । केचित्तु इको यणचीति ज्ञापकागमशास्त्रमनित्यमिति प्राप्तोऽपीडागमो नेति समादधुः ।

Colophon :

साहित्यकण्टकोद्धारः समाप्तः ।

D. No. 17880.

Pages, 3. Lines, 24 on a page. Telugu. Slightly injured. Extent, 42 granthas.

वेदाङ्गज्यौतिषम् by लगध ।

VEDĀṄGAJAUTIṢAM by Lagadha.

Begins on fol. 135 (*a*) of the manuscript described under D. No. 879, wherein this work was mentioned as kālajñana in the list of other works given therein.

Complete.

Same work as that described under D. No. 1027.

D. No. 17881.

Pages, 4. Lines, 20 on a page. Telugu. Injured. Extent, 50 granthas.

सामुद्रिकशास्त्रम् ।

SĀMUDRIKAŚĀSTRAM.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 5764.

Complete.

Taken from Vṛddavāsiṣṭha.

Similar to the work described under D. No. 14007.

Beginning :

नाडीशास्त्रं प्रवक्ष्यामि स्त्रीपुंसोर्दशलक्षणः ।
वामभागे तु . . . . पुरुष . . . . . . ॥

लक्षणोक्तं फलं पूर्ववयसेत्युत्क्रमात्कृतः (?) ।

वर्णहीनेन रोगत्वं स्वरहीनेन निर्धनम् ।
अल्पायुस्सत्वहीनेन सत्वे सर्वं प्रातिष्ठितम् ॥

सश्रीविरतरश्चाक्षु सार्धशनशपिङ्गलः (?) ।
सदीर्घबाहुर्नृपतिः समांसोपचितः सुखी ।

उरोविशालो धनधान्यभोगी
शिरोविशालो नृपपुङ्गवः स्यात् ।
कटे विशालो बहुहलशुद्धिः (?)
विशालपादो व्यसनी भवेत्सः ॥

End :

अन्यत्र दक्षिणावर्तमभिवृद्धिकरं भवेत् ।
अपसव्यान्तरावर्तमशुभप्रदमुच्यते ।
भृं . . . वाजिकुञ्जररथश्रीवत्सयूपेषुभि-
मालाकुण्डलचामराङ्कुशयवे . . ध्वजैस्तोमरैः (?) ॥

* * * * *

* * * * *

D. No. **17882.**

Page, 1. Lines, 17 on a page. Telugu. Injured. Extent, 14 granthas.

हनूमत्कवचः ।

HANŪMATKAVACAḤ.

Begins on fol. 82 (*b*) of the manuscript described under D. No. 5764.

Incomplete, wants the beginning.

Same work as that described under D. No. 7654 with a different verse in the end as given below.

End :

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यश्शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिमाञ्जनेयम् ॥

Colophon :

इति ब्रह्माण्डपुराणे अगस्त्यनारदसंवादे श्रीरामप्रोक्तं हनूमत्कवचं संपूर्णम् ।

D. No. 17883.

Pages, 3. Lines, 17 on a page. Telugu. Injured. Extent, 20 granthas.

रामाष्टोत्तरशतनामस्तोत्रम् ।

RĀMAṢṬOTTARAŚATANĀMASTOTRAM.

Begins on fol. 82 (*b*) of the manuscript described under D. No. 5764, wherein this work has been omitted to be included in the list of other works.

Complete.

Same work as that described under D. No. 8974 with different colophon.

Colophon :

इति हिरण्यगर्भसंहितायां रामचन्द्राष्टोत्तरशतनामपूजा संपूर्णा ।

D. No. 17884.

Pages, 6. Lines, 17 on a page. Telugu. Injured. Extent, 70 granthas.

भारतसावित्री ।

BHĀRATASĀVITRĪ.

Begins on fol. 83 (*b*) of the manuscript described under D. No. 5764.

Complete.

Same work as that described under D. No. 5779 with slight difference in the end as given below.

End :

संवत्सरकृतात् पापात् पठन्मर्त्यो विमुच्यते ।
यत्फलं गोसहस्रस्य सुवर्णालंकृतस्य च ।
दत्तस्य विधिवत्पात्रे तत्फलं लभते नरः ।

Colophon :

इति भारतसावित्री संपूर्णा ।

D. No. 17885.

Pages, 2. Lines, 18 on a page. Telugu. Injured. Extent, 16 granthas.

सूर्यकवचः ।

SŪRYACAVACAḤ.

Begins on fol. 86 (*b*) of the manuscript described under D. No. 5764.

Similar to the work described under D. No. 7577.

Beginning :

अस्य श्रीसूर्यकवचमन्त्रस्य अनुष्टुप् छन्दः । गिरिजा ऋषिः । सूर्यनारायणो देवता । मम श्रीसूर्यनारायणप्रसादसिद्ध्यर्थे जपे विनियोगः ।

देवासुरैः सदा वन्द्यं ग्रहैश्च परिवेष्टितम् ।
ध्यायेत्पठेत्सुवर्णाभं श्रीसूर्यकवचं तथा ॥

अनेकरत्नखचितं स्वर्णप्राकारशोभितम् ।
कल्पद्रुमसमाकीर्णं कवचं स्वर्णकामदम् ।

End :

कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः ।
जन्ममृत्युजराव्याधिसंसारभयनाशनः ॥

Colophon :

इति सूर्यकवचस्तोत्रं संपूर्णम् ।

D. No. 17886.

Pages, 2. Lines, 19 on a page. Telugu. Injured. Extent, 12 granthas.

मानसिकस्नानम् ।

MĀNASIKASNĀNAM.

Begins on fol. 87 (*a*) of the manuscript described under D. No. 5764.

Complete.

Same work as that described under D. No. 5789 with different end as given below.

End :

इला भागीरथी गङ्गा पिङ्गला यमुना नदी ।
तयोर्मध्यगता काशी उदङ्मुख्या सरस्वती ॥

इदं मानसिकं स्नानं स्नोकं हरिहरादिभिः ।
सहस्रादधिकं मन्त्रमवगाहाच्छताधिकम् ॥

Colophon :

मन्त्रस्नानविधिः संपूर्णः ।

D. No. 17887.

Pages, 2. Lines, 18 on a page. Telugu. Injured. Extent, 9 granthas.

अमृतमृत्युञ्जयत्र्यक्षरमन्त्रः ।

AMṚTAMṚTYUÑJAYATRYAKṢARAMANTRAḤ.

Begins on fol. 87 (*b*) of the manuscript described under D. No. 5764.

Complete.

Similar to the work described under D. No. 5890.

Beginning :

अस्य श्रीअमृतमृत्युञ्जयत्र्यक्षरमन्त्रस्य कहोल ऋषिः । देवीगायत्रीच्छन्दः । अमृतमृत्युञ्जयत्र्यक्षरुद्रो देवता । जुं बीजं, म शक्तिः । अमृतमृत्युञ्जयत्र्यक्षरजपे विनियोगः ।

End :

त्रिकालं यः पठेन्नित्यं पापं तस्य न विद्यते ।
शत्रुसैन्यक्षयं प्राप्तो दुःखप्रशमनं तथा ।
गङ्गायां मरणं चैव दृढा भक्तिस्तु केशवे ।
ब्रह्मविद्याप्रबोधश्च तस्मान्नित्यं पठेन्नरः ।

D. No. 17888.

Pages, 4. Lines, 18 on a page. Telugu. Injured. Extent, 32 granthas.

नारायणाष्टोत्तरशतनामस्तोत्रम् ।

NĀRĀYAṆĀṢṬOTTARAŚATANĀMASTOTRAM.

Begins on fol. 88 (*a*) of the manuscript described under D. No. 5764, wherein this work has been mentioned as Dharaṇī stotra in the list of other works.

Complete.

Same work as that described under D. No. 8935 with different beginning and colophon as given below.

Beginning :

श्रुतानि तानि सर्वाणि शुभानि जगतः प्रभो ।
नामान्यष्टशतान्येतं श्रोतुं कौतूहलं हि मे ।

वराह उवाच—

अयमेव पुरा प्रश्नः कृतः चन्द्रार्धमौलिना ।
न तस्यापि मयाख्यातं रहस्यत्वाच्छुचिस्मिते ।

* * * * *

अस्य श्रीधरणीस्तोत्रमहामन्त्रस्य । यज्ञवराह ऋषिः । मधुसूदनो देवता । अनुष्टुप् छन्दः । श्रीनारायणो देवता । श्रीनारायणप्रेरणया श्रीनारायणप्रीत्यर्थे श्रीनारायणस्तोत्रशतदिव्यनामस्तोत्रमन्त्रपठनं करिष्ये ।

नारायणो नरः शौरिश्चक्रपाणिर्जनार्दनः ।

Colophon :

इति वराहपुराणे धरणीवराहसंवादे धरणीस्तोत्रं संपूर्णम् ।

D. No. 17889.

Pages, 2. Lines, 18 on a page. Telugu. Injured. Extent, 13 granthas.

शुकस्तुतिः ।

ŚUKASTUTIH.

Begins on fol. 89 (*b*) of the manuscript described under D. No. 5764, wherein this work was omitted to be mentioned in the list of other works.

It consists of the stanzas 18 to 25 the end of fourth Adhyāya in second Skandha of Bhāgavata. The Colophon shows this work is in 15th Adhyāya in 10th Skandha of Bhāgavata.

Same work as that described under D. No. 10537, wherein see for the beginning.

D. No. 17890.

Pages, 3. Lines, 18 on a page. Telugu. Injured. Extent, 21 granthas.

मुचुकुन्दस्तुतिः ।

MUCUKUNDASTUTIḤ.

Begins on fol. 90 (*a*) of the manuscript described under D. No. 5764.

It consists of stanzas 46 to 58 of 51st Adhyāya in the 10th Skandha of Bhāgavata.

This is a stotra work in praise of Lord Mucukunda invoking him to protect the men or to save men from the whirlwind or maya of this world.

Beginning :

त्विमोहितोऽयं जन ईश मायया
त्वदीयया त्वां न भजत्यनर्थदृक् ।
सुखाय दुःखप्रभवेषु सज्जते
गृहेषु योषित्पुरुषश्च वञ्चितः ॥
लब्ध्वा जनो दुर्लभमत्र मानुषं
कथञ्चिदव्यङ्गमयत्नतस्तव ।
पादारविन्दं न भजत्यसन्मति-
र्गृहान्धकूपे पतितो यथा पशुः ॥

End :

तस्माद्विसृज्याशिष ईश सर्वतो
रजस्तमस्सत्वगुणानुबन्धनाः ।
निरञ्जनं निर्गुणमद्वयं परं
त्वां ज्ञप्तिमात्रं पुरुषं व्रजाम्यहम् ॥
चिरमिह वृजितार्तस्तप्यमानोरुतापै-
रवितृषषडमित्रो लब्धशान्तिः कथञ्चित् ।
शरणद समुपेतस्त्वत्पदाब्जं परात्म
न्नभयमृतमशोकं पाहि मापन्नमीश ॥

Colophon :

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे मुचुकुन्दस्तुतिर्नामैकपञ्चाशोऽध्यायः ।

D. No. 17891.

Pages, 3. Lines, 18 on a page. Telugu. Injured. Extent, 25 granthas.

गोपिकागीता ।

GOPIKĀGĪTĀ.

Begins on fol. 91 (*b*) of the manuscript described under D. No. 5764.

Complete.

Same work as that described under D. No. 2420, but with the addition of the undermentioned Colophon.

Colophon :

इति श्रीमद्भागवते दशमस्कन्धे गोपिकागीता नामैकत्रिंशोऽध्यायः ।

D. No. 17892.

Pages, 24. Lines, 18 on a page. Telugu. Injured. Extent, 288 granthas.

रुक्मिणीशविजयः ।

RUKMIṆĪŚAVIJAYAḤ.

Begins on fol. 95 (*a*) of the manuscript described under D. No. 5764.

Incomplete.

Contains the Sargas 1 and 2 complete and 3rd incomplete.

Same work as that described under R. No. 4108.

D. No. 17893.

Pages, 3. Lines, 18 on a page. Telugu. Injured. Extent, 22 granthas.

मध्वमङ्गलाष्टकम् ।

MADHVAMAṄGALĀṢṬAKAM.

Begins on fol. 106 (*b*) of the manuscript described under D. No. 5764.

Complete.

Eight stanzas in praise of Madhva, the well known propounder of the Dvaita school of Vedānta.

Beginning :

श्रीदेवीरमणं रमां विधिहरं दृष्ट्वा च भार्ये तथो-
वींशाहीशमृडांशविष्णुवनिताः षड्जाम्बवत्यादिकाः ।
सौवर्णीमपि वारुचिं च गिरिजामिन्द्रस्मरादीन् सुरान्
श्रीमध्वस्तुतिमङ्गलाष्टकमिदं वच्मि प्रणम्यादरात् ॥

श्रीशोत्कर्षजिदीश जीवितरसोच्छेदादिमिथ्यात्ववि-
द्दुर्वाद्युक्तिनिराकृतात्मसदृशो दृष्ट्वामरेन्द्रव्रजाः ।
ब्रह्मेन्द्रैर्हरिणार्थितेन कृपया यःप्रेरितो जन्मने
स श्रीमध्वमुनिर्हरिप्रियतमो दद्यात्सदा मङ्गलम् ॥

End :

जित्वा शङ्करमुख्यदुर्मतिगणान् सद्युक्तिशास्त्रादिभिः
कृत्वा सूत्र णादिभाष्यनिकरं दुःशास्त्रसंदूषकम् ।
संजीवाश्वसुदर्शनद्वयमहो संग्राहयामास यः
सः श्रीमध्वमुनिः . . . . मङ्गलम् ॥
श्रीमध्वस्तुतिमङ्गलाष्टकमिदं श्रीवेङ्कटाख्येन सं-
लक्ष्मीवल्लभतीर्थपूज्यचरणात्रेण भक्त्येरितम् ।
शृण्वन्ति प्रपठन्ति ये प्रतिदिनं कल्याणकालेषु वा
तेषां मध्वगुरुर्ददाति विपुलां विद्यां श्रियं शाश्वतीम् ॥

Fol. 107 (*a*) contains some Vedic stanzas.

D. No. **17894**.

Pages, 6. Lines, 18 on a page. Telugu. Injured. Extent, 110 granthas.

सालग्रामलक्षणम् ।

SĀLAGRĀMALAKṢAṆAM.

Begins on fol. 17 (*a*) of the manuscript described under D. No. 5764.

Incomplete.

Wants end.

Similar to the work described under D. No. 5809.

Beginning :

श्रीनारदः—

सालग्रामशिलाभेदा लक्षणं मूल्यनिर्णयम् ।

ब्रह्मा उवाच—

शृणु नारद वक्ष्यामि यन्मां त्वं परिपृच्छसि ।
सालग्रामशि . . . . ॥

सालग्रामवर्णनिर्णयः—

कथ्यतां भगवन् ब्रह्म रक्षितं (वै ?) वर्णनिर्णयः ।
श्यामं कृष्णं च नीलं च तथा वै पीतवर्णकम् ।

End :

प्रद्युम्नमूर्तिः - —

प्रद्युम्नमूर्ति चक्रं तु एतदीप्तं तथैव च (?) ।
सषि . . . दीर्घाकारं तु तद्भवेदित्युक्तम् ।
अनिरुद्धमूर्तिः . . . . ।

D. No. 17895.

Pages, 2. Lines, 28 on a page. Telugu. Injured. Extent, 20 granthas.

श्राद्धप्रयोगः ।

ŚRĀDDHAPRAYOGAḤ.

Begins on fol. 119 (*b*) of the manuscript described under D.No. 5764.

Incomplete.

Wants beginning and end.

Same work as that described under D. No. 3827, but with a different beginning.

Beginning :

. . . संकल्प्य करिष्ये, अग्निमुखं, अग्निं प्रतिष्ठाप्य, ये पार्थिवासः अग्निं परिस्तीर्य मुखान्तं कृत्वा (अग्निं परिस्तीर्य मुखान्तं कृत्वा), आवाहनम् ।

D. No. 17896.

Pages, 8. Lines, 20 on a page. Telugu. Injured. Extent, 30 granthas.

नागप्रतिष्ठाविधिः ।

NĀGAPRATIṢṬHĀVIDHIḤ.

Begins on fol. 121 (*a*) of the manuscript described under D. No. 5764.

Complete.

Similar to the work described under D. No. 3651.

Beginning :

संहितायां श्रीभगवानुवाच—

देवतार्चनविधौ विष्णुं प्रतिष्ठाप्य समर्चयेत् ।
भोगकैवल्यसिद्ध्यर्थं स्वकुलोद्धारणाय च ।
प्रतिष्ठितस्य बिंबस्य पूजनं विद्धि हानिकृत् ।
बिंबमन्त्रमयं कृत्वा तस्मिन् देवं समर्चयेत् ।

End :

ब्राह्मणं भोजयेत्पश्चात् शोभनं गृहमागतम् ।

Colophon :

इति शौनकीये नागप्रतिष्ठाविधिः ।

D. No. 17897.

Pages, 4. Lines, 20 on a page. Telugu. Injured. Extent, 25 granthas.

विष्णुपञ्चकव्रतम् ।

VIṢṆUPAÑCAKAVRATAM.

Begins on fol. 123 (*a*) of the manuscript described under D. No. 5764.

Incomplete.

Similar to the work described under D. No. 8524.

Foll. 122 and 123 (*a*) contain Śrāddhaprayogamantra.

Beginning :

. . . प्रसन्नास्यं सुरूपं शुभलक्षणम् ।
अर्चां संस्थाप्य मृत्तोयैः सलिलेष्वपि वासयेत् ॥
ऊर्ध्वदृष्टिं मध्यदृष्टिं तिर्यग्दृष्टिं च वर्जयेत् ।
ऊर्ध्वदृष्ट्याह्यर्थनाशो ह्यधोदृष्ट्या यशःक्षयः ।
तिर्यग्दृष्ट्यायुषो नाशस्तस्माद् ग्राह्यं समेक्षणम् ॥

End :

इद व्रतं महापुण्यं सर्वमङ्गलदायकम् ।
यःकुर्याद् भक्तिसंयुक्तः पञ्चपापैः प्रमुच्यते ।
तस्मात्त्वमपि देवेन्द्र कुर्वन् व्रतमनुत्तमम् ।
मुच्यते ब्रह्महत्याया नात्र कार्या विचारणा ।
पुरा सङ्कर्ष ऋष्याद्या विमुक्ताः पापसंघतः ।
कृत्वा व्रतमिदं पुण्यं सर्वाघौघविनाशनम् ॥

सूतः—

इत्युक्त्वा नारदं देवं तत्रोत्तरमुदीर्यते ॥
एवं कृत्वा ततो देवो विस्मयाकृष्टमानसः ।
कृत्वा पश्चाद् व्रतं पुण्यं मुक्तोऽभूद् ब्रह्महत्यया ॥

Colophon :

इति स्कान्दपुराणे इन्द्रनारदसंवादे विष्णुपञ्चकव्रतकल्पं संपूर्णम् ।

D. No. 17898.

Pages, 29 Lines, 6, 7 on a page. Telugu. Injured. Extent, 609 granthas.

भामतीव्याख्या—वेदान्तकल्पतरुः by अमलानन्दः ।

BHĀMATĪVYĀKHYĀ—VEDĀNTAKALPATARUḤ by Amalānanda.

Begins on fol. 38 (*a*) of the manuscript described under D. No. 12864.

Incomplete. Breaks off in the exposition of the Bhāmati on the first Sutra.

Same work as that described under D. No. 4677.

D. No. 17899.

Palm leaf. 16¾ × 1⅝ inches. Pages, 27. Lines, 8 on a page. Telugu. Good. Old. Extent, 540 granthas.

अमरुशतकम् with व्याख्या by अमरु and वेमभूपालः ।

AMARUŚATAKAM with Vyākhyā by Amaru and Vemabhūpāla.

Incomplete.

Contains 59 to 100 complete.

Same work as that described under D. No. 11921, but the orders of the stanzas are different from the printed book.

D. No. 17900.

Palm leaf. 17⅛ × 1½ inches. Pages, 87. Lines, 4 to 6 on a page. Telugu. Injured. Extent, 870 granthas.

चम्पूरामायणम् by भोजः ।

CAMPŪRĀMĀYAṆAM by Bhoja.

Incomplete.

Contains from 6th verse to the end of Sundarakāṇḍa.

Same work as that described under D. No. 12256.

Fol. 1st contains Campūrāmāyana with Vyākhyā.

Foll. 35 and 39 are missing.

D. No. 17901.

Pages, 32. Lines, 6 on a page. Telugu. Injured. Extent, 480 granthas.

साहित्यकण्टकोद्धारः ।

SĀHITYAKAṆṬAKODDHĀRAḤ

Begins on fol. 25 (*a*) of the manuscript described under D. No. 1786.

Incomplete.

Same work as that described under D. No. 17879.

End :

अत्र अनुपूर्वात् करोतेः कर्तृगेऽपि फले "अनुपराभ्यां कृञ्" इति सूत्रेण परस्मैपदता स्यादिति चेत्--सत्यं, प्रामादिकमेवेदमिति बहवः। संज्ञापूर्वको विधिरनित्य इतिन्यायेन परस्मैपदाभाव इत्यन्ये। अथ कथं निनीयतां ना . . . . ।

D. No. 17902.

Palm leaf. 16½ × 1½ inches. Pages, 18. Lines, 6 on a page. Telugu. Good. Old. Extent, 162 granthas.

भाषामञ्जरी by वेङ्कटार्यः।

BHĀṢĀMAÑJARĪ by Veṅkatārya.

Incomplete.

Similar to the work described under R. No. 1010.

Beginning :

श्रीभाष्यादिसमस्तशास्त्रचतुरः श्रीभाष्यकारः सुधी-
स्तत्पुत्रो भुवि वेङ्कलार्यविबुधः श्रीवेङ्कटाचार्यतः।
संख्यावत्प्रवरेण संस्कृतगवीसाधुप्रयोगार्थिना
तेनानेन वितन्य(ते) भुवि कृते गीर्वाणवाङ्मञ्जरी ॥

प्राचीनोदितशास्त्रसन्ततिसदभ्यासेन मेधाविनां
नॄणां संस्कृतवाक्प्रयोगपटुता संभाव्यते यद्यपि।
तादृग्विस्तृतशास्त्रगोचरचिराभ्यासालसानां तथा-
प्येषा स्यादुपकारिणी कृतिरतो जातो ममावोद्यमः ॥

कञ्चिद्भूमिपतिं प्रकल्प्य चतुरं कञ्चित्तदभ्याशगं
विप्रं चाखिलवेदिनं तदुभयप्रश्नोत्तरोक्तिच्छलात्।
मञ्जर्यां व्यवहारयोग्यवचसामस्यां प्रपञ्चं सुधीः
संगृह्णामि विमुक्तरोषहृदया गृह्णन्तु सारं बुधाः ॥

End :

एवमादयस्सर्वे स्वगृह एव वर्तन्ते। किंच इदमुत्कृष्टभाग्यं, अद्यापि तौ दृष्टियुक्तावेव वर्तेते। तौ पितरौ प्रतिदिनं दैवभावेन पश्यन्तः सर्वे पुत्राः हंसतूलिकातल्पे निवेश्य।

D. No. 17903.

Palm leaf. 17½ × 1 inches. Pages, 10. Lines, 39 on a page, Telugu. Injured. Old. Extent, 235 granthas.

भाषामञ्जरी ।

BHĀṢĀMAÑJARĪ.

Complete.

Similar to the work described under R. No. 1010.

Beginning :

भो विद्वन्, भवन्तमभिवादयामि, भवान् कस्माद्देशादागतः । अस्माद्दक्षिणदेशादागतोऽस्मि । तस्मिन् देशे को वा भवदीयग्रामः । नदीतीरे वा भवद्भिर्वक्तव्यः । अहं वक्ष्ये ; श्रूयताम् । सम्यक् । दक्षिणदेशे तावत् महान्तः कासारा वर्तन्ते । तटाकतीरे बहुशः पुष्करिण्यः । तत्र संस्थिता तन्मध्ये वेणीप्रभा नाम काचिन्नदी वर्तते । तस्याः पश्चिमे तीरे तावत् सर्वे ग्रामा नदीमातृकाः । तेषां मध्ये कल्याणपुरं नाम तिष्ठति । वक्ष्यामि श्रोतव्यम् ।

End :

रजतमुद्रिका दत्ताः ता गृहीत्वा तेषां दापय । ग्रामाधिकारस्त्वयैव ग्राह्यः अस्मिन् ग्रामे राजाधिकारो नास्ति ; त्वमेवाधिकारी । अन्यो न भवान् । ग्रामं सम्यक् पालय । त्वदधीनो ग्रामः । अहं मम राज्यं प्रति गमिष्यामि । स्वस्ति भवतु ते ।

The Scribe adds his name and date, Chandraśekhara, on the 4th day of the dark fortnight in the month of Āśvayuja of the year Nandana.

D. No. 17904.

Palm leaf. 17 × 1¼ inches. Pages, 44. Lines, 8 on a page. Telugu and grantha. Slightly injured. Old. Extent, 704 granthas.

अधिकरणसारार्थदीपिका by श्रीनिवाससूरि

ADHIKARAṆASĀRĀRTHADIPIKĀ by Śrinivāsasūri.

Complete.

Same work as that described under D. No. 4853.

D. No. 17905.

Palm leaf. $10\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 166. Lines, 446 on a page. Kannada. Injured. Old. Extent, 750 granthas.

उत्सवसंग्रहः ।

UTSAVASAṄGRAHAḤ.

Incomplete.

Similar to the work described under R. No. 3286.

Beginning :

एतद्भूसुरमुख्यानां श्रीमखं ग्रामवासिनाम् ।
अष्टोत्तरशतार्याणां शासनं सुरपूजितम् ।
पाञ्चरात्रं वेदवेद्यं साक्षाद्विष्णुमुखोद्भवम् ।

अष्टोत्तरसंहितायां—

. . . . तत्स्तवं चोत्सवं तथा ।
प्रयोगं लिखितं चैव सुपर्णो नाम यो द्विजः ।

* * * * *

एवंगुणविशेषणविशिष्टायां शुभतिथौ श्रीवेङ्कटेश्वरदेवतामुद्दिश्य श्रीवेङ्कटेश्वरप्रीत्यर्थं वेङ्कटेश्वरनवदिवसध्वजारोहणमहोत्सवं करिष्यमाणस्य मम ध्वजारोहणादिपुष्पयागान्तमध्यजसूतकनिवृत्त्यर्थं रक्षासूत्रबन्धनमहं करिष्ये ।

End :

गुडान्नं चरुसंयुक्तं वैष्णवैः सप्तमे दिने ।
पूर्वाह्णे वाथ मध्याह्ने रथसंस्थापनं कुरु ।

रथाग्रे मण्डपं कृत्वा लेपनं च शुचिर्मोहि तन्मध्ये मण्डलं कृत्वा ।

D. No. 17906.

Pages, 13. Lines, 6 on a page. Telugu. Injured. Old. Extent, 200 granthas.

नामसारस्तवः ।

NĀMASĀRASTAVAḤ.

Begins on fol. 27 (*a*) of the manuscript described under D. No. 6187.

Complete.

Same work as that described under R. No. 1517 (*t*), but the portion is different from that manuscript.

Beginning :

कनति कनकमञ्चे कामिनीमंसलग्नां
करधृतसुरवीणां लीलया लालयन्तीम् ।
अरुणमखिलभूषालङ्कृतं चन्द्रमौलिं
दलित . . . . तिं दक्षिणामूर्तिमीडे ॥

श्रीमद्वैकुण्ठनिलयं श्रीपतिं सिद्धसेवितम् ।
सनकादिमहायोगिसेवितांघ्रिसरोरुहम् ॥

ब्रह्माद्यैर्देवतावृन्दैः पूजितं भक्तकामदम् ।
नारदादिसुरर्षीणां स्तवाकर्णनतत्परम् ॥

गन्धर्वैर्गीयमानं च देवस्त्रीसंघसेवितम् ।
त्रिलोकरक्षण . . . . देवदेवं परात्परम् ॥

* * * * *

नामसारस्तवं नित्यं पठन् विष्णो दृढव्रत ।
शत्रवस्तस्य पठनात्तव वश्या भवन्ति ते ।
इत्युक्त्वा मां महादेवो . . . . त्वा मम प्रियम् ।
नामसारस्तवं मह्यं दत्तवान् परमेश्वरः ।

End :

श्रुत्वा क्षेमकरं देवी सर्वसौभाग्यदायकम् ।
बहुनोक्तेन किं लक्ष्मि नामसारस्य कीर्तनात् ।
प्रिय . . . . नामसारस्तवं परः ।
अनेन प्रीयते देवी श्यामलांबा महेश्वरी ॥

Colophon :

इति सौभाग्यलक्ष्मीमहामन्त्रे चातुर्लक्षग्रन्थविस्तरे नामसारस्तवः संपूर्णः ।

D. No. 17907.

Pages, 6. Lines, 4 on a page. Telugu. Good. Extent, 45 granthas.

विनायकपूजाविधिः ।

VINĀYAKAPŪJĀVIDAIḤ.

Begins on fol. 136 (*a*) of the manuscript described under D. No. 5661.

Complete.

Same work as that described under D. No. 8693.

D. N. 17908.

Page, 5. Lines, 4, 6 on a page. Telugu. Good. Extent, 55 granthas.

भैरवमन्त्रः ।

BHAIRAVAMANTRAḤ.

Begins on fol. 214 (*a*) of the manuscript described under D. No. 5661.

Complete.

Similar to the work described under D. No. 6846.

Beginning :

अस्य श्रीप्रचण्डभैरवदिग्बन्धनमहामन्त्रस्य ब्रह्मा ऋषिः । गायत्री छन्दः । महाभैरवो देवता । क्षां बीजं, प्रचण्डभैरवेति शक्तिः । क्रीं कीळकं, मम शरीररक्षणार्थे विनियोगः ।

End :

समस्तदिग्देवतात्मकं रमापतिं विष्णुदैवतं बन्ध बन्ध मां रक्ष रक्ष, अचल चल, माक्रम्य क्रम्य महाबज्रकवचास्त्राय राजचोराग्निसर्पसिंह व्याघ्रमल्लूकभूतप्रेतपिशाचब्रह्मराक्षसादिसर्वोपद्रवान् नाशय नाशय हुं फट् स्वाहा ।

Colophon :

भैरवदिग्बन्धनं संपूर्णम् ।

D. No. 17909.

Pages, 4. Lines, 6 on a page. Telugu. Slightly injured. Extent, 30 granthas.

महान्यासः (पञ्चाङ्गरुद्रन्यासः) ।

MAHĀNYĀSAḤA (Pañcāṅgarudranyāsaḥ).

Begins on fol. 43 (*a*) of the manuscript described under D. No. 8717.

Complete.

Similar to the work described under D. No. 6576.

Beginning :

नमस्ते रुद्र मन्यव उतात इषवे नमः । नमस्तेऽस्तु धन्वने बाहुभ्या-
मुत ते नमः ।

End :

ऊर्ध्वमुखाय नमः । सह नाववतु । सह नौ भुनक्तु । सह वीर्यं
करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः ।
शान्तिः ॥

The Scribe adds—

पा(भ)व नाम(छव) सं — चैत्र. ब. १३. स्थिरवारं सम्पाटिकरणं
पश्चाङ्गरुद्रम् ।

D. No. 17910.

Pages, 8. Lines, 6, 7 on a page. Telugu. Injured. Extent, 85 granthas.

नील(क)ण्ठमन्त्रः ।

NĪLAKAṆṬHAMANTRAḤ.

Begins on fol. 20 (*a*) of the manuscript described under D. No. 5483.

Complete.

Similar to the work described under D. No. 6505.

Beginning :

अस्य श्रीनीलकण्ठाथर्वणशिरसि नीलकण्ठास्त्रमहामन्त्रस्य
आथर्वण ऋषिः । श्रीनीलकण्ठरुद्रो देवता । हं बीजं, नः शक्तिः ।
ग्लौं कीलकम् । मम नीलकण्ठप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

वीरशूरनीलकण्ठास्त्राय मां रक्ष । मम हृदये सदा सुस्थिरो भव ।
मङ्गलाङ्गणद सन्मङ्गल सहस्रानन्त . . . व्रत नीलकण्ठास्त्राय मां रक्ष ।
मम हृदये सदा एह्येहि, स्थिरो भव सुस्थिरो भव अथर्वणनीलकण्ठास्त्राय
हुं फट् स्वाहा ।

D. No. 17911.

Palm leaf. 15⅜ × 1½ inches. Pages, 244. Lines, 4 on a page. Kannada. Injured. Old. Extent, 1,500 granthas.

पाञ्चरात्रागमः

PAÑCARĀTRĀGAMAḤ.

Incomplete.

Contains Pūjāvidhi, Aṅkurārpanavidhi and kalaśasnapanavidhiḥ.

Similar to the work described under D. No. 5286.

Beginning :

बलिपीठं समाश्रित्य अर्चयेत् पार्षदेश्वरान् ।
पीठस्य चैन्द्रदिग्भागे स्थित्वा वै बिंबधारकम् ॥
पीठस्य दक्षिणे पार्श्वे उत्तराभिग . . . . स्थिताः ।
पूजयित्वा यथान्यायं पीठे वै पार्षदेश्वरान् ॥
द्रव्यं सर्वाणि निक्षिप्य बलिपीठे समर्चयेत् ।
पीठं प्रदक्षिणीकुर्यात शीघ्रं गत्वा प्रदक्षिणम् ॥

Colophon :

इति पाञ्चरात्रे महोपनिषदि पाद्मे तन्त्रे चर्यापादे महोत्सवविधिर्नाम विंशोऽध्यायः ।

Colophon :

इति पाञ्चरात्रे कापिञ्जलसंहितायां . . . . र्चनविधिर्नाम पञ्चदशोऽध्यायः ।

Colophon :

इति पाञ्चरात्रे ईश्वरसंहितायामङ्कुरार्पणविधिर्नाम पञ्चदशोऽध्यायः ।

Colophon :

इति श्रीपाञ्चरात्रे अनिरुद्धसंहितायां पञ्चविंशतिकलशस्नपनं नाम त्रयस्त्रिंशोऽध्यायः ।

End :

इति विष्णुगायत्री । पञ्चोपनिषन्मन्त्राः । ओं षौं नमः । पराय परमेष्ठ्यात्मने नमः । ओं यां नमः । पराय पुरुषात्मने नमः । ओं रां नमः । पराय विश्वात्मने नमः । ओं वां नमः । पराय नित्यात्मने नमः । ओं लां नमः पराय सर्वात्मने नमः ।

समिधो मे स्थितो वह्नौ शयानस्य घृताहुतिः ;
अन्नमासनकं चैव समिधा यानयाहुतिः ।

D. No. 17912.

Palm leaf. 15¾ × 1 inches. Pages, 104, Lines, 4—6 on a page. Grantha. Injured. Old. Extent, 1,000 granthas.

पाञ्चरात्रागमः ।

PĀÑCARĀTRĀGAMAḤ.

Incomplete.

Similar to the work described under D. No. 5287.

Beginning:

विष्णुं लोकगुरुं प्रणम्य शिरसा सन्मार्गसन्दर्शकं
कीर्तिप्रीतिकरं . . . . लेन कामप्रदम् ।
सेव्यं सद्यतिभिः कृतप्लुतपदं न्यासाप्तलोकत्रयं
तालानां कथयामि लक्षणमहं पूर्वोक्तशास्त्रक्रमात् ॥
ऋग्यजुःसामवेदेभ्यो वेदाच्चाथर्वणादपि ।
पाठ्यं चाभिनयाद् गीतं सारं संगृह्य पद्मभूः ॥
व्यचीचरत्त्रयमिदं धर्मकामार्थमोक्षदम् ।
अपि ब्रह्मप . . . इदमभ्याधिकं ध्रुवम् ।
प्रयोगमुद्धृतं स्मृत्वा स्वप्रयुक्तं ततो हरिः ॥

* * * * *

एकमूर्तिप्रधानं तु मात्रसिद्धान्तमुच्यते ।
चतुर्मूर्तिप्रधानन्तु तत्तदागमपूर्वकम् ।
नवमूर्तिप्रधान च तन्त्रसिद्धान्तमिष्यते ।
चतुर्वक्त्रैर्न · इक्कैर्देवैर्यत्रार्चनाविधिः ।
तत्तन्त्रान्तरमिष्टं स्यात्सर्वं सर्वफलप्रदा ।

Colophon:

गुस. अष्टादशगणो नाम षड्विंशोऽध्यायः ।
पुरा हिमवतः शृङ्गे सुरम्ये हेममण्डपे ।
माणिक्यवज्रवैडूर्यवितानपरिशोभिते ।
यक्षगन्धर्वसिद्धैश्च सुरकिन्नरसेविते ।

तस्मिन् गीतसभामध्ये ब्रह्माणमिव तेजसा ।
सुखोपविष्टं वरदं काहलं भरतात्मजम् ।
कृताञ्जलिपुटो भूत्वा मतङ्गः परिपृच्छति ।
. . . . प्रभाते मुनिसत्तम ।
तथैव कति रागाश्च सायंकाले शुभप्रदाः ।
कति रागाः षाडवाश्च संपूर्णा औडवास्तथा ।

End :

सप्तमं देवतान्यासमष्टमं स्पर्शनं तथा ।
आरोहणन्तु नवमं दशमं भ्रमणं तरेत् ।
. . . . ।
त्रयोदशप्रार्थनं च चतुर्दशफलप्रदम् ।
पञ्चदशोद्वासनं तु स्यात् पवित्रारोहण . . .
. . . . द्वितीयं लक्षणं तथा ।
तृतीयं कालमित्युक्तं चतुर्थं शकुनं तथा ।
पञ्चमं दारुविच्छेदं प्रमाणं षष्ठमेव च ।
. . . . अष्टमं तथा ।
नवमं तूत्सवं चैव दशमं प्रार्थनं तथा ।
एकादशोऽर्चनं चैव द्वादशं च फलप्रदम् ।

D. No. 17913.

Palm leaf. 16¾ × 1½ inches. Pages, 126. Lines, 4, 5 on a page. Kannada and grantha. Injured. Old. Extent, 1,100 granthas.

प्रयोगमाणमालिका ।

PRAYOGAMAṆIMĀLIKĀ.

Begins on fol. 1 (*a*). The other work herein is Pāñcarātrāgama, 64 (*a*).

Contains Paṭalas 1 and 10 complete.

On certain initiatory ceremonies intended for the priests in Śiva temples.

Beginning :

नमः सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥
दीक्षाविधिमथो वक्ष्ये समासान्मुनिपुङ्गव ।
उत्तरायणकाले तु दीक्षाकर्म समाचरेत् ॥
दीयन्ते सिद्धयः सर्वाः क्षीयन्ते ग्रन्थयोऽप्यतः ।
दीक्षात्वमेव दीक्षायां धर्माधर्मप्रदात्मनः ।
वसन्तग्रीष्मयोर्दीक्षा कार्या वा कार्तिकादिषु ॥

Colophon :

इति प्रयोगमणिमालिकायां प्रथमः पटलः ।

End :

सूकरी करसंकोची मृगी मुक्तकनिष्ठिका ।
हंसी मुक्तकतर्जन्या होममुद्राः प्रकीर्तिताः ॥
चरूणां सूकरी प्रोक्ता आज्ये मृगमुखी तथा ।
समिधो हंसमुद्रा च होममुद्राः प्रकीर्तिताः ॥

Colophon :

इति प्रयोगमणिमालिकायां दशमः पटलः ।

There are some Arghya mantras in the end.

D. No. 17914.

Pages, 49. Lines, 6 on a page. Grantha and Kannaḍa. Slightly injured. Extent, 368 granthas.

पाञ्चरात्रागमः ।

PĀÑCARĀTRĀGAMAḤ.

Begins on fol. 64 (*a*) of the manuscript described under D. No. 17913.

Incomplete.

Similar to the work described under D. No. 5286.

Beginning :

विष्णोराराधनपरं शास्त्रमेतत्प्रकीर्तितम् ।
महार्णवनिमग्नानां पुंसां सिद्धिकरं परम् ॥
वासुदेवस्य देवस्य परस्य परमात्मनः ।
परं ब्रह्म परं ज्योतिः परतत्वस्य रूपिणः ॥

स्वयं भगवतो विष्णोर्मुखांबुजविनिर्गतम् ।
पाञ्चरात्राख्यममृतं पुण्यं पापविनाशनम् ॥
यथा सर्वेषु देवेषु परो नारायणः स्मृतः ।
तथा सर्वेषु शास्त्रेषु पाञ्चरात्रं परं स्मृतम् ॥

Colophon :

इति श्रीपाञ्चरात्रे सात्वतसंहितायां गृहसंप्रोक्षणं नाम पञ्चविंशोऽध्यायः ।

Colophon ;

इति पाञ्चरात्रे सात्वतसंहितायां गृहार्चनप्रतिष्ठा नाम त्रयस्त्रिंशोऽध्यायः ।

End :

अळङ्कारासनभोज्यासनयात्रासनशय्यासनौपचारिकसांस्पर्शनसांदृष्टिकाभिमानिषहृदयङ्गमचतुःषष्ट्युपचारषट् कालार्चनानन्त्यिहामेनित्यबालीनित्योत्सवमासोत्सव . . . . . . ।

D. No. 17915.

Pages, 2. Lines, 4 on a page. Telugu. Slightly injured. Extent, 14 granthas.

ग्रहणदोषवारणश्लोकाः ।

GRAHAṆADOṢAVĀRAṆAŚLOKĀḤ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 8195.

Complete.

Same work as that described under D. No. 3298 with three addi- stanzas in the end as given below.

नीलांबरो नीलवपुः किरीटी
करालवक्त्रः करवालशूली ।
चतुर्भुजश्चर्मधरश्च राहु-
र्व्योमाधिरूढो वरदोऽस्तु मह्यम् ॥

सुवर्णलिखितं पट्टं ग्रहणे अभिषेचितम् ।
राहुदोषप्रशान्त्यर्थं गृहाण त्वं द्विजोत्तम ॥
महेश्वरधृतः शूलो सर्वदोषापनोदकः ।
तव मूर्तिप्रदानेन शूलदोषं निवारय (?) ॥

D. No. 17916.

Palm leaf. $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 176. Lines, 7 on a page. Grantha. Injured. Old. Extent, 1,900 granthas.

याज्ञवल्क्यस्मृतिः with मिताक्षरा ।

YĀJÑAVALKYASMṚTIḤ with Mitākṣarā.

Incomplete.

Contains up to the end of Divyaprakarana of Vyavahārakāṇḍa.

Same work as that described under D. No. 2684.

D. No. 17917.

Palm leaf. $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 644. Lines, 6 on a page. Grantha. Injured. Old. Extent, 6,700 granthas.

भेदधिक्कारसत्क्रियोज्वला ।

BHEDADHIKKĀRASATKRIYOJVALĀ.

Incomplete.

Same work as that described under D. No. 4723.

D. No. 17918.

Palm leaf. $6 \times 1\frac{1}{2}$ inches. Pages, 32. Lines, 6, 7 on a page. Telugu. Injured. Old. Extent, 120 granthas.

चाटुश्लोकाः ।

CĀṬUŚLOKĀḤ.

Similar to the work described under D. No. 12016.

Incomplete.

Beginning :

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो ब्रह्मण्यदेवाय वासिष्ठाय नमो नमः ॥
दासीगर्भसमुद्भूतो नारदोऽयं महामुनिः ।

वल्मीकिगर्भसंभूतो वाल्मीकोऽयं [किन्तु] महामुनिः ।
तपसा ब्राह्मणो भूत्वा जातिभेदं न कारयेत् ॥
क्षत्रियागर्भसंभूतो विश्वामित्रो महामुनिः ।
तपसा ब्राह्मणो भूत्वा जातिभेदं न कारयेत् ॥

End:

वित्तेन हीनं पुरुषं त्यजन्ति
दाराश्च पुत्राश्च सहोदराश्च ।
त्वमर्थवन्तं धनराजयन्ति (?)
अर्थो हि लोके पुरुषयस्य बन्धुः ॥

D. No. 17919.

Palm leaf. 15 × 1½ inches. Pages, 140. Lines, 7 on a page. Grantha. Much injured. Old.

संकर्षभाट्टदीपिका by भास्कराग्निचित् ।

SAṄKARṢABHĀTTADĪPIKĀ by Bhāskarāgnicit.

Incomplete.

Same work as that described under D. No. 4511.

D. No. 17920.

Palm leaf. 14 × 1½ inches. Pages, 104. Lines, 5, 6, 7 on a page. Telug. Injured. Old. Extent, 1,274 granthas.

स्मृतिसारसमुच्चयः ।

SMṚTISĀRASAMUCCAYAḤ.

Incomplete.

Breaks off in Saṅkrāntinirṇayaḥ.

Same work as that described under D. No. 2811.

D. No. 17921.

Palm leaf. 15 × 2¼ inches. Pages, 54. Lines, 12 to 16 on a page, Grantha. Slightly injured. Old. Extent, 1,274 granthas.

द्वादशाविधपुत्रनिरूपणम् ।

DVĀDAŚAVIDHAPUTRANIRŪPAṆAM.

Incomplete.

Similar to the work described under R. No. 5442 (*d*).

Beginning :

अथ नानाविधपुत्राणां पितृधनग्राहित्वे विशेषप्रतिपत्त्यर्थं प्रथमं त एव निरूप्यन्ते ।

तत्र मनुः—

पुत्रान् द्वादश यानाहुर्नृणां स्वायंभुवो मनुः ।
तेषां षड बन्धुदायादाः षडदायादबान्धवाः ॥

औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट् ॥

कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः ॥
स्वयंभुवो ब्रह्मणः पुत्रो मनुः चतुर्दशानां मनूनामाद्यो मनुः ।

End :

विंशं पौनर्भवायेति हारीतः । पौनर्भववस्तु परत इति ब्रह्मपुराणम् । परतः, एकादशामित्यर्थः । एकैकमितरेषामिति शंखलिखितौ । इतरेषां पौनर्भवकानीनगूढोत्पन्नानाम् ।

बृहस्पतिः—

क्षेत्रजो गर्हितः साद्भि-
स्थ । पौनर्भवस्सुतः ।
कानीनश्च सहोढश्च
गूढोत्पन्नस्तथैव च ॥

अत्र निन्दाबीजं तेषां मातुर्व्यभिचारित्वमिति ज्ञेयम् । . . . अत्र-दत्तकः—

याज्ञवल्क्यः क्षेत्रबीजान्यतरसंबन्ध . . . . . ।

D. No. 17922.

Pages, 102. Lines, 7 on a page. Grantha. Injured. Extent, 1,450 granthas.

ललितार्चनमञ्जरी ।

LALITĀRCANAMAÑJARĪ.

Des. Cat.—9

Begins on fol. 101 (*a*) of the manuscript described under D. No. 10867.

Complete.

Contains 1 to 13 Stabakas.

Similar to the work described under D. No. 5716.

The Index of stabakas are given below :—

१. प्राभातिकविधिः ।
२. तान्त्रिकसन्ध्यावन्दनविधिः ।
३. भूतशुद्धिप्राणप्रतिष्ठाविधिः ।
४. मातृकान्यासप्राणायामविधिः ।
५. ललितायोगपीठविन्यासविधिः ।
६. जलविद्यान्यासविधिः ।
७. मानसपूजाविधिः ।
८. चक्राद्यासादनाविधिः ।
९. आत्मपूजायोगपीठपूजाविधिः ।
१०. चतुरायतनपूजाविधिः ।
११. . . . . ।
१२. श्रीचक्रसमस्तावरणपूजाविधिः ।
१३. . . . . ।

Beginning :

शिवं गुरुं गणेशं च प्रणम्य परदेवताम् ।
श्रीचक्रपूजनं वक्ष्ये संक्षेपेण क्रमोदितम् ॥

तत्र श्रीमान् साधकेष्टः . . . . त्रेस्तुरीययामात्मके वा ब्राह्मे मुहूर्ते शय्यायाः समुत्थाय रात्रिवासस्त्यक्त्वान्ये वाससी परिधाय तात्कालिकमावश्यकं कृत्वा शुचिराचा . . . . वा शुचिर्भूत्वा स्वशिरसि सहस्राग्कमले निजगुरुं ध्यायेत् । तद्यथा—

प्रातः शिरसि शुक्लेऽब्जे द्विनेत्रं द्विभुजं गुरुम् ।
वराभयकरं शान्तं स्मर . . . . . ।

* * * *

समुद्रमेखले देवि ! पर्वतस्तनमण्डले ।
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ।

इत्यनेन भूमिं प्रार्थ्य श्वासानुसारेण तस्यां पादं निधाय गृहाद् बहिर्निर्गच्छेत् ।

Colophon :

इति श्रीललितार्चनमञ्जर्यां प्राभातिकविधिः प्रथमः स्तबकः

Colophon :

इति ललितार्चनमञ्जर्यां श्रीचक्रसमस्तावरणपूजाविधिर्द्वादश • • • • • • (स्तबकः)

End :

तथा त्रिकोणबिन्दुचक्रयो • • • • • णि समाचरेत् इति—

समाप्तश्च ग्रन्थः ।

Foll. 52 and 53 (*a*) contain Phalaśrutī of Tripurā or Lalitāpūjāvidhi which is taken from Jñānārṇava, Bhaviṣyottarapurāṇa and Tantrarāja.

D. No. 17923.

Page, 1. Lines, 6 on a page. Telugu. Injured. Extent, 14 granthas.

सालग्रामलक्षणम् ।

SĀLAGRĀMALAKṢAṆAM.

Begins on fol. 50 (*a*) of the manuscript described under D. No. 2965.

Incomplete.

Similar to the work described under D. No. 5809.

Fol. 50 (*b*) is left blank.

Beginning :

वेदव्यास उवाच—

सालग्रामशिलाभेदो लक्षणं मूर्तिनिर्णयः ।
कथ्यतां भगवन् ब्रह्मन् क्षेत्रं वर्णश्शुभाशुभम् ॥

ब्रह्मा उवाच—

श्यामाः कृष्णाः शुक्लपीता नीलवर्णास्तथैव च ।
पाण्डुरा रक्तवर्णाश्च कपिला इति ताः शिलाः ॥

End :

वराहः शक्तिलिंगस्तु चक्रे तु विषमास्थिते ।
इन्द्रनीलनिभःस्थूलस्त्रिरेखालाञ्छितः शुभः ॥

D. No. 17924.

Pages, 2. Lines, 5 on a page. Telugu. Injured. Extent, 20 granthas.

विष्णुसूक्तम् ।

VIṢṆUSŪKTAM.

Begins on fol. 51 (*a*) of the manuscript described under D. No. 2965.

Complete.

Same work as that described under D. No. 228.

D. No. 17925.

Pages, 15. Lines, 5 on a page. Kannada. Injured. Extent, 120 granthas.

चिकदेवरायस्तुतिः with कर्णाटकटीका ।

CIKADEVARĀYASTUTI with Kannaḍa meaning.

Begins on fol. 39 (*b*) of the manuscript described under D. No. 11256.

Complete.

A eulogy on king Cikkadevarāya. It seems that under his patronage the work Śivastutiratnamālā might have been composed.

Beginning :

जयति ललितविद्यो विश्रुताशेषविद्यो
जनितगुणकदंबश्चन्द्रचूडावलंबः ।
निरवधिजयधन्यः सर्वराजेन्द्रमान्यः
विजितरिपुसमाजः चिक्कभूरुद्रराजः ॥

नावात्सं वटमूलसीमनि बृसीं नाध्यासिषं प्रत्युषः
व्याकर्शां पदशास्त्रविस्तरविधौ नावापुषं वैदुषीम् ।
नागायिष्यादितैः सुतेष्वपि स्तुतेष्टाचार्यक श्लाघितुं
किं वा ते प्रभवामि कीर्तिममितां श्रीचिक्कभूमीपते ॥

End:

श्रीमच्चिक्कप्पविश्राणनगुणनिवहाकर्णनावाप्तलज्जा-
वैमुख्यं कामदोग्ध्री श्रयति विटपिनः कल्पकाः स्वल्पकाः
स्युः ।
निस्संरोधा च कीर्तिर्जठरविनिहितक्षीरपाथोधिगर्भे-
ब्रह्माण्डस्यापि शौरेरुदयस्थितपयोवार्धिबुद्धिं विधत्ते ॥

D. No. 17926.

Pages, 4. Lines, 4 on a page. Kannada. Injured. Extent, 32 granthas.

चिकदेवरायस्तुतिः ।

CIKADEVARĀYASTUTIḤ.

Begins on fol. 56 (*b*) of the manuscript described under D. No. 11256.

Complete.

Same work as that described under D. No. 17925.

D. No. 17927.

Pages, 3. Lines, 7 on a page. Telugu. Slightly injured. Extent, 28 granthas.

भूशुद्धिमन्त्रः ।

BHŪŚUDDHIMANTRAḤ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 6032.

Complete.

Similar to the work described under D. No. 6842.

Beginning:

भूशुद्धिप्रकारः शुद्धदेशे प्रविश्य भुवं निरीक्ष्य तत्र स्थित्वा स्थलं शोधयेत् । अघोरचक्षुरित्यस्य मन्त्रस्य । सूर्या सावित्री ऋषिः । सूर्या सावित्री देवता । त्रिष्टुप् छन्दः । भूनिरीक्षणे विनियोगः ।

End:

व्यामादिस्सचतुर्दशस्वरविसर्गान्तःस्फुरत्कर्णिका
किञ्जल्कालिखितस्वरप्रतिदलप्रागादि . . . ष्टकम् ।
. . बिंबेन च सप्तमार्णवयुजा चालाचसंवेष्टितं
वर्णाब्जं . . रासिस्थितं विषगदप्रध्वंसिमृत्युंजयम् ॥

D. No. 17928.

Pages, 3. Lines, 7 on a page. Telugu. Injured. Extent, 17 granthas.

आसनमन्त्रः ।

ĀSANAMANTRAH.

Begins on fol. 2 (*a*) of the manuscript described under D. No. 6032.

Complete.

Similar to the work described under D. No. 5993.

Beginning :

. . . . . इति लिखित्वा भावयित्वा तस्मिन्नासने चेलाजिनकुशास्तरणानि परिस्तीर्य । पृथिव्या मेरुपृष्ठ ऋषिः, कूर्मो देवता, . . . च्छन्दः, आसने विनियोगः ।

End :

ओं नमो भगवते सालग्रामनिवासिने सच्चिदानन्दस्वरूपाय भक्तिमार्गप्रवर्तकाय श्रीमद्वेङ्कटपरापरगुरवे नमः । ओं नमो ब्रह्मविद्भ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो नमो वं . . . ऋषिभ्यो नमो ऋषिभ्यो नमो गुरुभ्यः । प्रत्यगभिन्नसीतासमेतश्रीरामचन्द्रचरणारविन्दाभ्यां नमः । इति गुरुवन्दनं कुर्यात् ।

D. No. 17929.

Pages, 2. Lines, 7 on a page. Telugu. Injured. Extent, 12 granthas.

मातृकासंहारः ।

MĀTṚKĀSAMHĀRAH.

Begins on fol. 3 (*a*) of the manuscript described under D. No. 6032.

Complete.

A mantra addressed to Lord Śiva for withdrawing the characters or alphabets used in diagram and supposed to have a magical power.

Beginning :

बीजेनाचम्य तेनैव प्राणानायम्य संकल्पं कुर्यात् । ततः मातृकासंहारं करिष्ये इति संकल्प्य क्षकारं लकारे प्रविलापयामि । लकारं हकारे

प्रविलापयामि । हकारं सकारे प्रविलापयामि । सकारं षकारे प्रविलापयामि । षकारं शकारे प्रविलापयामि । शकारमिकारे प्रविलापयामि। इकारं आकारे प्रविलापयामि । आकारं अकारे प्रविलापयामि । अकारं ब्रह्मरन्ध्रे प्रविलापयामि ।

End :

पुरहर अतलादिसप्तलोकेषु सर्वभूतेभ्यो मां रक्ष रक्ष, भूतेश भूलोकादुपरि सप्तलोकषु सर्वापमृत्युभ्यो मां रक्ष रक्ष, भूर्भुवःस्वरोमिति-दिग्बन्धः ।

D. No. 17930.

Pages, 6. Lines, 7 on a page. Telugu. Injured. Extent, 50 granthas.

हनूमन्मालामन्त्रः ।

HANŪMANMĀLĀMANTRAḤ.

Begins on fol. 3 (*b*) of the manuscript described under D. No. 6032.

Complete.

Similar to the work described under D. No. 7685.

Beginning :

ततः हनूमद्दिग्बन्धनं कुर्यात् । अस्य श्रीहनूमन्मालामन्त्रस्य, शौनक ऋषिः, अतिजगती छन्दः, मारुतात्मा इति बीजं, ह्रीं अञ्जनासूनुरिति-शक्तिः, अं शंभुपुत्रायेति कीलकं ।

End :

पूर्ववन्मन्त्रन्यासं कृत्वा दिग्विमोचनाविनियोग इति संकल्प्य पूर्वमन्त्रमेव पठित्वा मन्त्रान्ते श्रीरामदूताय हुंफट् स्वाहेत्यन्ते उच्चार्य ऐन्द्रीं दिशं मोचयामीति दिग्विमोचनं कुर्यात् ।

D. No. 17931.

Pages, 3. Lines, 7 on a page. Telugu. Injured. Extent, 20 granthas.

भूतशुद्धिः ।

BHŪTAŚUDDHIḤ.

Begins on fol. 6 (*a*) of the manuscripts described under D. No. 6032.

Complete.

Similar to the work described under D. No. 6839.

Beginning :

दिग्बन्धनानन्तरं भूतशुद्धिं कुर्यात् ।

हृदंबुजे ब्रह्मकन्दसंभूते ज्ञाननालके ।
ऐश्वर्याष्टदलोपेते परं वैराग्यकर्णिके ॥

* * * * *

अथ भूतशुद्धिः—अस्य श्रीभूतशुद्धिमहामन्त्रस्य । ब्रह्माविष्णुमहेश्वराः ऋषयः । गायत्री त्रि बृहती पंक्तिः छन्दांसि । पञ्चतत्वानीति-बीजं, पञ्च तत्वात्मिकेति शक्तिः ।

End :

तथाविधां मायां नित्यशुद्धमुक्तस्वभावे स्वात्मप्रकाशरूपे सत्यज्ञाना-नन्दलक्षणे परमपरमार्थभूतपरब्रह्मणि प्रविलाप्य नित्यशुद्धबुद्धपरमा-नन्दरूपं परब्रह्माहमस्मीति चिरकालं भावयेत् ।

D. No. 17932.

Pages, 3. Lines, 7 on a page. Telugu. Injured. Extent, 20 granthas.

पापपुरुषदहनम् ।

PĀPĀPURAṢADAHANAM.

Begins on fol. 7 (*a*) of the manuscript described under D. No. 6032.

Complete.

Similar to the work described under D. No. 3675.

Beginning :

इति कृत्वा—पापपुरुषशोषणदाहननिर्गमनप्लावनस्थिरीकरणपुण्यपुरुष-प्राणप्रतिष्ठां करिष्य इति संकल्प्य—

ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम ।
सुरापानहृदा युक्तं गुरुतल्पकापिद्वयं (?) ।
तत्स(त्प)योग पदद्वन्द्वमङ्गप्रत्यङ्गपातकम् ।
अचेतनमधोवक्त्रं रक्तश्मश्रुविलोचनम् ।
खड्गचर्मधरं पापमंगुष्ठपरिमाणकम् ।

End :

स्वशरीरे स्वात्मकं सर्वज्ञं सर्वशक्तिसमुत्पन्नं समस्तदेवतामन्त्रमयं सच्चिदानन्दरूपं परब्रह्मरूपिणं सुप्रतिष्ठितमिति भावयेत् ।

D. No. 17933.

Pages, 3. Linee, 7 on a page. Telugu. Injured. Extent, 20 granthas.

प्राणप्रतिष्ठामन्त्रः ।

PRĀṆAPRATIṢṬHĀMANTRAH.

Begins on fol. 8 (*a*) of the manuscript described under D. No. 6032.

Complete.

Same work as that described under D. No. 6677 with different end as given below.

End :

अमृतं वै प्राणः अमृतमापः प्राणानेव यथास्थानमुपह्वयते, ओं क्षं, सं हं, सः, ह्रीं ओं डं, सः इति प्राणप्रतिष्ठा ।

D. No. 17934.

Pages, 7. Lines, 7 on a page. Telugu. Slightly injured. Extent, 60 granthas.

मातृकासरस्वतीमन्त्रः ।

MĀTṚKĀSARASVATĪMANTRAH.

Begins on fol. 9 (*a*) of the manuscript described under D. No. 6032.

Complete.

Similar to the work described under D. No. 6933.

Beginning :

अथ मातृकान्यासः ।

अस्य श्री अन्तर्मातृका सरस्वतीमहामन्त्रस्य । ब्रह्मा ऋषिः । गायत्रीच्छन्दः । श्री अन्तर्मातृका सरस्वती देवता । हलो बीजानि । स्वराः शक्तयः । बिन्दवः कीलकानि । अनुष्ठीयमानश्रीराममन्त्राङ्गमातृकान्यासजपे विनियोगः ।

करांङ्गुलीनां रेखासु स्वरैरेकं प्रविन्यसेत् ।
विन्यसेत् प्रणवं पाणितलयोः पृष्ठयोरपि ॥

End :

ध्यानं—

अक्षस्रजं हरिणपोतमुदग्रटङ्कं
विद्यां करैरविरतं दधतीं त्रिनेत्राम् ।
अर्धेन्दुमौलिमरुणामरविन्दनेत्रां
वर्णेश्वरीं प्रणमत स्तनभारनम्राम् ॥

बिन्दुयुक्तां मातृकां तु विन्यसेदानुलोमतः ।

अं नमः, आं नमः, इं नमः, ईं नमः, उं नमः, ऊं नमः, कं नमः, क्षं नमः । इति बिन्दुमातृकान्यास. ।

D. No. 17935.

Palm leaf. 11¼ × 1¼ inches. Pages, 5. Lines, 6 on a page. Telugu. Slightly injured. Old. Extent, 35 granthas.

अष्टमुखगण्डभेरुण्डनृसिंहमालामन्त्रः ।

AṢṬAMUKHAGAṆḌABHERUṆḌANṚSIṂHAMĀLĀMANTRAḤ.

Begins on fol. 14 (*a*). The other works herein are—Aṣṭamukhagaṇḍabheruṇḍanṛsiṃhasakalacarācarākarṣaṇa mālāmantraḥ, 17 (*a*). Pratyaṅgirābhadrakālimantraḥ, 21 (*a*). Pratikriyāśūlinīmantraḥ, 25 (*a*). Siddhāricakram, 27 (*a*). Puraścaraṇavidhiḥ, 1 (*a*) (Telugu).

Complete.

Similar to the work described under D. No. 5908.

Beginning :

ओं नमो भगवते अष्टमुखगण्डभेरुण्डसकलभूतादिसंहरणकल्पान्तकनृसिंहमालामन्त्रस्य नारदभगवान् ऋषिः । अनुष्टुप्छन्दः अष्टमुखगण्डभेरुण्डकल्पान्तकनृसिंहमालामन्त्रदेवता । क्रां बीजं. भ्रां शक्तिः । फट् कीलकं, मम अष्टमुखगण्डभेरुण्डकल्पान्तनृसिंहप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

वज्रेण कृन्तय, आं ह्रीं, श्रीं, गण्डभेरुण्ड नसिंहाय हुं फट् स्वाहा—

D. No. 17936.

Pages, 7. Lines, 6 on a page. Telugu. Slightly injured. Extent, 50 granthas.

अष्टमुखगण्डभेरुण्डनृसिंहसकलचराचराकर्षणमालामन्त्रः ।

AṢṬAMUKHAGAṆḌABHERUṆḌANṚSIṀHASAKALACARĀCA-RĀKARṢAṆAMĀLĀMANTRAḤ.

Begins on fol. 17 (*a*) of the manuscript described under D. No. 17935.

Complete.

Same work as that described under D. No. 5910.

D. No. 17937.

Pages, 8. Lines 5, 6 on a page. Telugu. Slightly njured. Extent, 60 granthas.

प्रत्याङ्गिराभद्रकालीमन्त्रः ।

PRATYAṄGIRĀBHADRAKĀLĪMANTRAḤ.

Begins on fol. 21 (*a*) of the manuscript described under D. No. 17935.

Complete.

Similar to the work described under D No. 6651.

Beginning :

पूर्वोक्त + + शुभतिथौ अथर्वणभद्रकालीप्रत्याङ्गिरायै पूजामहामन्त्रप्रसाद सिद्ध्यर्थं अथर्वणभद्रकालीप्रत्याङ्गिरायै मालामहामन्त्रजपं करिष्ये ।

End :

सर्वशूलनिवारणाय सकलरोगनिवारणाय सर्वग्रहमुच्चाटय उच्चाटय हुं फट् ह्रीं प्रत्याङ्गिरायै स्वाहा, सकलदुष्टग्रहमुच्चाटय उच्चाटय हुं फट् ।

D. No. 17938.

Pages, 4. Lines, 5 on a page. Telugu. Slightly injured. Extent, 27 granthas.

प्रतिक्रियाशूलिनीमन्त्रः ।

PRATIKRIYĀŚŪLINĪMANTRAḤ.

Begins on fol. 25 (*a*) of the manuscript under D. No. 17935.

Complete.

Similar to the work described under D. No. 6644.

Beginning :

पूर्वो = प्रतिक्रियाशूलिनीमहामन्त्रप्रसादसिद्ध्यर्थे प्रतिक्रियाशूलिनी-महामन्त्रस्य । ईश्वर ऋषिः ; अनुष्टुप् छन्दः । श्रीप्रतिक्रियाशूलिनी देवता । ओं ह्रीं रुं बीजं,

End :

ओं ह्रीं क्षुं भक्ष; ज्वाला, ओं हे करालदंष्ट्रे प्रत्यङ्गिरे क्षं, ह्रीं, हुं फट् ओं नमो नारायणाय ओं ह्रीं घृणिस्सूर्य आदित्यों सहस्रार हुं फट् स्वाहा—(अङ्गन्यासं) ।

D. No. 17939.

Pages, 3. Lines, 5 on a page. Telugu. Slightly injured. Extent, 10 granthas.

सिद्धारिचक्रम् ।

SIDDHĀRICAKRAM.

Begins on fol. 27 (*a*) of the manuscript described under D.No. 17935.

Complete.

Same work as that described under D. No. 8137 with different end.

End :

सिद्धसाध्यं, सुसिद्ध सुसिद्धं, सुसिद्धारि, अरिसिद्धं, अरिसाध्यं, अरिसुसिद्ध, अरि अरि,

Foll. 28 (*a*) and 29 (*a*) contain Tīrthaśrāddhavidhi and some Saṅkalpas.

D. No. 17940.

Pages, 2. Lines, 5 on a page. Telugu, Slightly injured. Extent, 5 granthas.

पञ्चमुद्रालक्षणम् ।

PAÑCAMUDRĀLAKṢAṆAM.

Begins on fol. 32 (*a*) of the manuscript described under D. No. 6025.

Complete.

Similar to the work described under D. No. 15072.

Beginning :

सुमुखं संपुटं चैव विततं विस्तृतं तथा ।
द्विमुखं त्रिमुखं चैव चतुःपञ्चमुखं तथा ।
षण्मुखोऽधोमुखं चैव व्यापकाञ्जलिकौ तथा ।
शकटं यमपाशञ्च ग्रथितं षण्मुखोन्मुखम् ।

End :

त्रिशूलं लिङ्गयोनिं च पाशं परशुरेव च ।
पञ्चाक्षर्या इति ख्याताः पञ्चमुद्राः प्रकीर्तिताः ॥

D. No. 17941.

Pages, 4. Lines, 5 on a page. Telugu. Good. Extent, 21 granthas.

पञ्चमुखहनूमन्मन्त्रः ।

PAÑCAMUKHAHANŪMANMANTRAḤ.

Begins on fol. 20 (*b*) of the manuscript described under D. No. 6157.

Complete.

Similar to the work described under D. No. 7685.

Beginning :

अस्य श्री पञ्चमुखहनुमन्महामन्त्रस्य । शौनक ऋषिः । जगती च्छन्दः । श्रीपञ्चमुखहनूमान् रुद्रो देवता । मारुतात्मजायेति बीजं, आञ्जनेयायेति शक्तिः । वायुपुत्रायेति कीलकम् । मम पञ्चमुखहनुमन्मालामन्त्राधिदेवता सर्वग्रहोच्चाटनार्थे जपे विनियोगः ।

End :

ओं, ऐं, ह्रां, श्रीं, ह्रैं, क्लीं, क्ष्रौं, ऐं, ह्रां, ओं नमो भगवते पञ्चवक्त्राय वीरहनूमते मम सकलकार्यसिद्धिं कुरु कुरु स्वाहा, ओं ह्रीं, हरिमर्कट मर्कटाय स्वाहा—

D. No. 17942.

Pages, 3. Lines, 5 on a page. Telugu. Good. Extent, 12 granthas.

बगलामुखीमालामन्त्रः ।

BAGALĀMUKHĪMĀLĀMANTRAḤ.

Begins on fol. 163 (*b*) of the manuscript described under D. No. 537.

Similar to the work described under D. No. 6708.

Complete.

Beginning :

अस्य श्री बगलामुखीमालामन्त्रस्थ । नारदभगवान् ऋषिः । अनुष्टुप् छन्दः । श्रीबगलामुखीमहालक्ष्मीर्देवता । ओं बीजं, ह्लां शक्तिः, स्वाहा कीलकम् । मम सर्वेषां दुष्टानां वाचं मुखं पदं स्तम्भनार्थे जपे विनियोगः ।

End :

ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु दुर्लभम् ।
गुरुभं(भ)क्ताय दातव्यं न देयं यस्य कस्यचित् ॥

मालामन्त्रम् । ओं ह्लां बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय । जिह्वां कीलय । बुद्धिं विनाशय ह्लां स्वाहा ॥

D. No. 17943.

Pages, 14. Lines, 6 on a page. Telugu. Slightly injured. Extent, 115 granthas

त्रिपुरसुन्दरीमालामन्त्रः ।

TRIPURASUNDARĪMĀLĀMANTRAḤ.

Begins on fol. 13 (*a*) of the manuscript described under D. No. 9577.

Complete.

Similar to the work described under D. No. 6343.

Beginning :

मुक्ताकुन्देन्दुगौरां मणिमयमुकुटां रत्नताटङ्कयुक्ता-
मक्षस्रक्पुष्पहस्तामभयवरकरां चन्द्रचूडां त्रिनेत्राम् ।
नानालङ्कारयुक्तां सुरमुकुटमणिद्योतितस्वर्णपीठां
सानन्दां सुप्रसन्नां त्रिभुवनजननीं चेतसा चिन्तयामि ॥

ओं नमो भगवति, गान्धारि, भुवनेश्वरि, ओं ह्रां ह्रीं मौक्तिकालङ्कारि, परमानन्दमानन्दमानसी मम शत्रूणां वाग्ग्रन्थिनि, उद्योगविघ्नकरि, ममोद्योगसिद्धिकरि,

* * * *

एवंगुणविशेषणविशिष्टायां शुभतिथौ ममायुष्याभिवृद्ध्यर्थं धनकनकवस्तुवाहनसमृद्ध्यर्थं पुत्रपौत्राभिवृद्ध्यर्थं मम समस्तमङ्गलावाप्त्यर्थमिष्टकाम्यार्थसिद्ध्यर्थं, मम सर्ववशीकरसिद्ध्यर्थं श्रीभुवनेश्वरीदेवतामुद्दिश्य भुवनेश्वरीदेवताप्रीत्यर्थं भुवनेश्वरीमालामन्त्रजपं करिष्ये । अस्य श्री महात्रिपुरसुन्दरीमालामन्त्रस्य ।

End :

ब्रह्माभ्यन्तं मातृकायन्त्रपीठे
त्र्यश्रे बिन्दौ सच्चिदानन्दरूपे ।
ध्यायेच्चिद्रूपेन्द्रविख्यातलीलो-
ल्लासि श्रीमद्देशिकेन्द्राङ्घ्रिपद्मम् ॥

ह्रौं श्रीगुरवे नमः ।

D. No. 17944.

Pages, 2. Lines, 7 on a page. Telugu. Injured. Extent, 21 granthas.

शिवमन्त्रस्नानविधिः ।

ŚIVAMANTRASNĀNAVIDHIḤ.

Begins on fol. 23 (*a*) of the manuscript described under D. No. 5630.

Complete.

The mantras that are to be chanted at the time of taking a sacred bath for the purpose of propitiating God Śiva.

Beginning :

नित्यस्नानानन्तरं श्रीशिवनाम्ना शिवगायत्र्या ममोपात्तसमस्तदुरित-क्षयद्वारा श्रीपार्वतीशमुद्दिश्य श्रीपार्वतीशप्रीत्यर्थं शिवमन्त्रोपासनाप्रातः स्नानमहं करिष्ये । जलमस्त्रमन्त्रेण संशोध्य ।

End :

जलमादाय वामहस्ते निधाय मूलमन्त्रेणाभिमन्त्र्य तिलकं कृत्वा तीरमागत्य वहिः पादं कृत्वा उपविश्य श्री शिवनाम्नाचम्य श्रीगुरुपादतीर्थं स्वीकृत्य ततः शिवनामतीर्थं स्वीकृत्य शुद्धवस्त्रधारणं कुर्यात् ।

Colophon :

इति स्नानविधिः ।

D. No. 17945.

Pages, 4. Lines, 7 on a page. Telugu. Injured. Extent, 32 granthas.

शिवसन्ध्याविधिः ।

ŚIVASANDHYĀVIDHIḤ.

Begins on fol. 23 (*b*) of the manuscript described under D. No. 5630.

Complete.

The Sandhya mantras of Saivaites—Special mantras to be chanted by the followers of Saivism in praise of Lord Siva.

Beginning :

शिवसन्ध्याविधिप्रकारः—

गन्धादिपञ्चमानसोपचारान्तं स्नानपद्धति . . . . प्रकारमेव तत्रत्यजलं मालामन्त्रमुच्चरन्नों नमो भगवते सदाशिवाय, सर्वभूतात्मने महादेवाय नमः । इत्युच्चरन्नरञ्जलिना गृहीत्वा वामहस्ते . . निधाय जलं विसृज्य दक्षिणहस्तस्थजलं मूलमंत्रेणाभिमन्त्रच वामहस्ते पुनर्मूलमन्त्रेणाभिमन्त्र्यतद्गलितजलेन ओं नमो भगवते श्रीसदाशिवाय भूतात्मने महादेवाय नमः ।

End :

ततो निर्वाणमुद्रां प्रदर्श्य श्रीसूर्यमण्डलस्थितश्रीसदाशिवं नेत्रगोलकद्वारा हृदयपद्मे सञ्चिन्त्य, चतुस्सागरपर्यन्तं गुरवे नमः ।

D. No. 17946.

Pages, 2. Lines, 7 on a page. Telugu. Injured. Extent, 10 granthas.

शिवपञ्चाक्षरीमन्त्रः ।

ŚIVAPAÑCĀKṢARĪMANTRAḤ.

Begins on fol. 25 *(a)* of the manuscript described under D. No. 5630 wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Similar to the work described under D. No. 7393.

Beginning :

शिवपञ्चाक्षरी—अस्य श्रीशिवपञ्चाक्षरीमहामन्त्रस्य । वामदेव ऋषिः । पंक्तिःछन्दः । श्रीसदाशिवो देवता । नं बीजं मं शक्तिः यं कीलकं, मम श्रीसदाशिवप्रीत्यर्थे (जपे) विनियोगः ।

End :

ओं नमश्शिवाय

छिन्दन्ति शैलानुदधिं पिबन्ति
व्यत्यासय . . . क्षिति . . . . क्षम् ।
तृणीकृतब्रह्मपुरन्दराणां
किं दुष्करं शङ्करकिङ्कराणाम् ॥

D. No. 17947.

Pages, 2. Lines, 7 on a page. Telugu. Injured. Extent, 10 granthas.

प्रासादपञ्चाक्षरीमन्त्रः ।

PRĀSĀDAPAÑCĀKṢARĪMANTRAḤ.

Begins on fol. 25 (b) of the manuscript described under D. No. 5630 wherein this work has been omitted to be mentioned in the list of other works.

Complete.

Similar to the work described under D. No. 6689.

Complete.

Beginning :

अस्य श्रीप्रसादपञ्चाक्षरीमन्त्रस्य। वामदेव ऋषिः। पङ्क्तिः श्छन्दः। श्रीसदाशिवो देवता। ह्रीं ह्रौं ओमिति बीजं, उमेति शक्तिः, ब्रह्मा बीजं, मायाशक्तिः, जीवो बीजं, बुद्धिः शक्तिः, सुषुम्ना नाडी सरस्वती शक्तिः प्रसादपञ्चक्षरीसदाशिवप्रीत्यर्थे विनियोगः।

End :

ओं ह्रीं, ह्रौं, ओं, ओं, नमः शिवाय, ओं नमो भगवते, श्री-सदाशिवाय, सर्वभूतात्मने, महादेवाय नमः, ओं पार्वतीवल्लभाय स्वाहा।

D. No. 17948.

Pages, 2. Lines, 7 on a page. Telugu. Injured. Extent, 6 granthas.

उमामहेश्वरपञ्चाक्षरीमन्त्रः।

UMĀMAHEŚVARAPAÑCĀKṢARĪMANTRAḤ.

Begins on fol. 26 (a) of the manuscript described under D. No. 5630 wherein this work has been omitted to be mentioned in the list of other works.

Complete.

This mantra is intended to please Lord Umāmaheśvara.

Beginning :

अस्य श्री उमामहेश्वरपञ्चाक्षरीमहामन्त्रस्य। वामदेवः ऋषिः। पङ्क्तिः छन्दः। श्रीमदुमामहेश्वरो देवता। प्रणवो बीजां ह्रां शक्तिः, ह्रौ कीलकं, श्रीमदुमामहेश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः।

End :

मन्त्रः—ओं ह्रां, ह्रां ओं नमःशिवाय।

D. No. 17949.

Pages, 2. Lines, 5 on a page. Telugu. Slightly injured. Extent, 8 granthas.

मङ्गलारात्रिकश्लोकाः ।

MAṄGALĀRĀTRIKAŚLOKĀḤ.

Begins on fol. 3 (*a*) of the manuscript described under D. No. 366.

Complete.

Slokas to be uttered as recited at the time of performing Maṇgala Ārati, burning of camphor in the circular form before the God enshrined at Mt. Sri Sailam.

Beginning :

आरती श्रीशैलवास मङ्गलारती मङ्गलारती सुरगर्वगजसमूह मत्तकेसरी-चारुमौनिहृप्तयोजसदनमधुकरी आरती (१) ।

End :

अविरलभ्रमराम्बनेत्र कुव(लय)सुधाकरी, भुवि(नि ?) मल्लिकार्जुन प्रभुत्वशेखरी आरती ।

D. No. 17950.

Pages, 6. Lines, 5 on a page. Telugu. Slightly injured. Extent, 40 granthas.

विभूतिधारणविधिः ।

VIBHŪTIDHĀRAṆAVIDHIḤ.

Begins on fol. 4 (*a*) of the manuscript described under D. No. 366.

Complete.

Similar to the work described under D. No. 5485.

Beginning :

श्रीमद्गुरुमहं वन्दे शिवज्ञानप्रदायिनम् ।
सत्यज्ञानपरानन्दं संसा(रा)र्णवतारकम् ॥
ब्रह्मानन्दं परमसुखदं केवलज्ञानमूर्तिं
वेदातीतं विमलमचलं तत्वमस्यादिलक्ष्यम् ।
एकं नित्यं निरुपमपदं सर्वदा साक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

* * * * *

इति गुरु . . . . ध्थानम् ।

यो लिङ्गधारी नियतान्तरात्मा
नित्यं शिवाराधनबद्धचित्तः ।
सं धा·येत्सर्वमलापहत्यै
भ . . . . चारु यथाप्रयोगम् ॥

पुनाति यज्जगत्सर्वं त्रिपुण्ड्रात्मा सदाशिवः ।
ऐश्वर्यं प्राप्तबीजाय तस्मै श्रीभस्मने नमः ।

* * * * *

भूतिर्भूतिकरी पवित्रजननी पापौघविध्वंसनी
सर्वोपद्रवनाशिनी शुभकरी सर्वार्थसंपत्करी ।
भूतप्रेतपिशाचराक्षसगणारिष्टारिसंहारिणी
तेजोराज्यविभूतिमोक्षकरणी भूतिस्सदा धार्यताम् ।

End :

श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने ।
घृतत्रिपुण्ड्रपूतत्मा मृत्युं जयति मानवः ॥
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येन विप्रेण शिरसि त्रिपुण्ड्रं भस्मना धृतम् ॥
भस्मज्योतिर्भवत्येव शिवाख्यं नैव संशयः ।
जाबालोपनिषत्सर्वं प्राहैवं परया मुदा ॥

Colophon :

इति विभूतिधारणम् ।

D. No. 17951.

Pages, 4. Lines, 5 on a page. Telugu. Slightly injured. Extent, 22 granthas.

रुद्राक्षधारणविधिः ।

RUDRĀKṢADHĀRAṆAVIDHIḤ.

Begins on fol. 6 (*b*) of the manuscript described under D. No. 366.

Complete.

Similar to the work described under D. No. 5471.

Beginning :

भस्मना विहितस्नानस्त्रिपुण्ड्राङ्कितमस्तकः ।
शिवार्चनपरो नित्यं रुद्राक्षमपि धारयेत् ॥
रुद्राक्षवृक्षबीजाय भूतिसंभूतिहेतवे ।
नेत्रत्रयाय रुद्राय नमो लोकहितार्थिने ॥

इति रुद्राक्षनमस्कारः—

एकवक्त्रं शिवं साक्षादष्टैश्वर्याभिवृद्धिदम् ।
द्विवक्त्रं देवदेवेशं संपदं पुत्रपौत्रवान् ।
त्रिवक्त्रमनलं साक्षात्सर्वव्याधिनिवारणम् ।
चतुर्वक्त्रं स्वयं ब्रह्म आयुर्विद्याविशेषतः ।

End :

मृत्युकाले तु रुद्राक्षं निष्पिष्य सहवारिणा ।
तज्जलं च पिबेन्नित्यं स रुद्रत्वमवाप्नुयात् ।
अरुद्राक्षधरो भूत्वा यत्किञ्चित्कर्म वैदिकम् ।
कुर्याद्विप्रस्तु यो मोहान्नासावाप्नोति तत्फलम् ।

D. No. 17952.

Pages, 2. Lines, 5 on a page. Telugu. Slightly injured. Extent, 8 granthas.

लिङ्गाष्टकम् ।

LINGAṢṬAKAM.

Begins on fol. 13 (*b*) of the manuscripts described under D. No. 366.

Complete.

Similar to the work described under D. No. 11151.

Beginning :

अनादिमलसंसाररोगवैद्याय शंभवे ।
नमश्शिवाय शान्ताय ब्रह्मणे लिङ्गमूर्तये ॥
प्रलयार्णवसन्ता[नन्दा]य प्रलयोद्भूतहेतवे ।

नमः शिवाय—

ज्वालामालावृतांगाय ज्वलनस्तंभरूपिणे ।
आदिमध्यान्तरहितस्वभावामलमूर्तये ॥

End :

लिङ्गाष्टकमिदं पुण्यं यः पठेल्लिङ्गपूजने ।
शिवलोकमवाप्नोति शिवेन सह मोदते ॥
. . . त्मस्वरूपाय शिवभावप्रदायिने ।
नमः सद्गुरुनाथाय षड्बलब्रह्ममूर्तये ॥

शिवाय (नमो) नमः ।

D. No. 17953.

Pages, 7. Lines, 5 on a page. Telugu. Slightly injured. Extent, 30 granthas.

श्यामलास्तोत्रम् ।
ŚYĀMALĀSTOTRAM.

Begins on fol. 53 (*a*) of the manuscript described under D. No. 3862.

Complete.

Similar to the work described under D. No. 10846.

Beginning :

वन्देऽहं वनजेक्षणां वसुमतीं वाग्देवतां वैष्णवीं
शब्दब्रह्ममयीं शशाङ्कवदनां शातोदरीं शाङ्करीम् ।
संविज्ञां सशिवां समश्रितपदामाधारचक्रे स्थितां
चिद्रूपां सकलेप्सितार्थवरदां बालां भजे श्यामलाम् ॥

End :

बालामालमनोहरं प्रतिदिनं वाञ्छन्ति वाच्यं पठे
वेदे शास्त्रविवादकालसमये जित्वा सभामध्यमे ।
पञ्चाशत्स्वरवर्णमालिक पठेजिह्वाग्रसंस्थे स्थितां
धर्मार्थाखिलकामवीक्षितकृपां सिध्यन्ति मोक्षप्रदाम् (?) ॥

D. No. 17954.

Pages, 4. Lines, 6 on a page. Telugu. Slightly injured. Extent, 14 granthas.

संविन्मन्त्रः ।
SAMVINMANTRAḤ.

Begins on fol. 57 (*a*) of the manuscript described under D. No. 3862 wherein this work has been omitted to be mentioned in the list of other works.

Incomplete.

Similar to the work described under D. No. 7466.

Beginning :

अस्य श्रीसंविन्महामन्त्रस्य । आनन्दभैरव ऋषिः । विराट् छन्दः । श्रीकुलकुलेश्वरी देवता । ह्रां बीजं, ह्रौं शक्तिः ह्रः कीलकं, मम श्री संवित्प्रसादसिध्यर्थे जपे विनियोगः ।

End :

संवित्संविन्महा संविन्महीयामेधां प्रज्ञां प्रयत्य(च्छ)स्वाहा—

अज्ञाने राधने दीप्ते प्रज्ञानाज्ञ ज्वालरूपिणी आनन्द ज्या . . . ।

D. No. 17955.

Pages, 12. Lines, 5 on a page. Telugu Slightly injured. Extent, 55 granthas.

हनुमन्मालामन्त्रः ।

HANŪMANMĀLĀMANTRAḤ.

Begins on fol. 1 (*a*) of the manuscript described under D. No. 6387.

Complete.

Same work as that described under D. No. 7686.

Fol. 20 (*b*) contains some Karāvalambanastotra.

D. No. 17956.

Pages, 3. Lines, 9 on a page. Telugu. Injured. Extent, 62 granthas.

अश्वत्थनारायणस्तोत्रम् ।

AŚVATHANĀRĀYAṆASTOTRAM.

Begins on fol. 8 (*a*) of the manuscript described under D. No. 9842.

Asvatthanārāyaṇastotra found in Brahmaṇḍa Purāna—By reciting it all the sins will be washed and all desires will be fulfilled and benevolent effects will occur to the reader.

Beginning :

अस्य श्रीअश्वत्थनारायणस्तोत्रमन्त्रस्य । नारदऋषिः । अनुष्टुप् छन्दः । अश्वत्थनारायणो देवता । मम अ. + + + गः ।

ध्यानम्—

प्रवक्ष्यामि . . सर्वपापप्रणाशनम् ।
सर्वकामफलं नृणां पुत्रसौभाग्यकारणम् ॥

End :

अश्वत्थसेवा तिलपात्रदानं
गोस्पर्शनं ब्राह्मणतर्पणञ्च ।
एतानि सद्यः प्रहरन्ति पापं
गङ्गानदी भारतकीर्तनं च ॥

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे अश्वत्थनारायणस्तोत्रं संपूर्णम् ।

D. No. 17957.

Pages, 3. Lines, 9 on a page. Telugu. Injured. Extent, 47 granthas.

आदित्यपूजायन्त्रः ।

ĀDITYAPŪJĀYANTRAḤ.

Begins on fol. 9 (*b*) of the manuscript described under D. No. 7156.

Complete.

Adityapūja Yantraḥ as told by Brahman is powerful enough to cure diseases like fever, etc.

Beginning :

अथातः संप्रवक्ष्यामि रोगार्तानां शरीरिणाम् ।
तृचकल्पविधानेन शान्तिं प्रोक्तां विधातृभिः ॥
ज्वरादिरोगशान्त्यर्थं धर्मकामार्थसिद्धये ।
कलत्रपुत्रसहितः यजमानोऽमृताय च ।
सूर्यमाराधयेत्सम्यक् तृचमन्त्रेण धर्मवित् ।
पञ्चाङ्गशुद्धिदिवसे चन्द्रतारावलंबिते ।

End :

ओं नमो नारायणाय जय नारसिंहाय नमः ओं नमो भगवते रामचन्द्राय उत्तिष्ठ श्रीकर स्वाहा । ओं आं, ह्रीं, हुं, क्रीं, फट्, भास्कराय विद्महे अं - क्ष आं

वश्याद्यन्तोक्तमन्त्रेण कमां . तु . श्रमालिखेत् ।
आदित्यपूजायन्त्रं वै ब्रह्मणा समुदीरितम् ॥

D. No. 17958.

Pages, 4. Lines, 4 on a page. Nāndinagari. Extent, 16 granthas.

कृष्णयजुर्वेदब्राह्मणम् ।

KṚṢṆAYAJURVEDABRĀHMAṆAM.

Incomplete.

Contains a small portion of 1st Aṣṭaka of Kṛṣṇyajurveda-brāhmaṇa.

Same work as that described under D. No. 142.

D. No. 17959.

Pages, 2. Lines, 4 on a page. Telugu. Slightly injured. Extent, 3 granthas.

गरुडमालामन्त्रः ।

GARUḌAMĀLĀMANTRAḤ.

Begins on fol. 25 (*a*) of the manuscript described under D. No. 9298.

Complete.

Same work as that described under D. No. 6170.

Foll. 25 (*b*) to 27 contain some Bhāṣāmantras.

D. No. 17960.

Pages, 5. Lines, 9 on a page. Telugu. Injured. Extent, 38 granthas.

देव्युपनिषत् ।

DEVYUPANIṢAT.

Begins on fol. 3 (*a*) of the manuscript described under D. No. 2549.

Complete.

Same work as that described under D. No. 543.

D. No. 17961.

Pages, 16. Lines, 6 on a page. Telugu. Injured. Extent, 234 granthas.

शिवपुराणम् ।

ŚIVAPURĀṆAM.

Begins on fol. 6 (*a*) of the manuscript described under D. No. 2549.

Contains Adhyāya 29 only.

Same work as that described under D. No. 2364.

D. No. 17962.

Pages, 2, Lines, 6 on a page. Telugu. Injured. Extent, 11 granthas.

ललितासहस्रनामस्तोत्रम् ।

LALITĀSAHASRANĀMASTOTRAM.

Begins on fol. 132 (*a*) of the manuscript described under D. No. 2549.

Incomplete.

Wants the beginning and end.

Same work as that described under D. No. 9183.

D. No. 17963.

Pages, 18. Lines, 7 on a page. Telugu. Injured. Extent, 220 granthas.

कार्तवीर्यार्जुनकवचः ।

KĀRTAVĪRYĀRJUNAKAVACAḤ.

Begins on fol. 9 (*a*) of the manuscript described under D. No. 2456.

Complete.

Similar to work described under D. No. 6056.

Beginning :

अस्य श्रीकार्तवीर्यार्जुनकवचस्तोत्रमन्त्रस्य दत्तात्रेयभगवानृषिः । अनुष्टुप् छन्दः । श्रीकार्तवीर्यार्जुनो विष्णुश्चक्रवर्ती देवता । कृतवीर्यसुतो बीजम् । सहस्रभुजभृत् शक्तिः । अव्याहत इति कीलकम् । मम कार्तवीर्यार्जुनप्रसादसिद्ध्यर्थे जपे विनियोगः ।

अव्यात् सर्वभयात् प्रभाकरनिभप्रद्योतनद्योतितः
सद्योऽसृक्पुरिवीतकन्धरधरो रक्तांशुकोष्णीषवान् ।

नानाकल्पविभूषितः करसहस्त्रार्धी बाणासनो (?)
बाणात्तार्धसहस्त्रबाहुरनिशं भूवल्लभो नः प्रभुः ॥

End :

सुभक्ताय सुशिष्याय दद्यात् सर्वस्वदायिने ।
साधकानां हितार्थाय यदुक्तं चन्द्रमौलिना ॥

कार्तवीर्यस्य कवचं तदुक्तं वै मया तव ।
येन संरक्षितो देवि! कालेनापि न जीर्यते ॥

तस्मात्सर्वप्रयत्नेन कवचं धारयेत्सुधीः ।

D. No. 17964.

Page, 1. Lines 7 on a page. Telugu. Injured. Extent, 119 granthas.

त्रिपुरसुन्दरीषोडशाक्षरीमन्त्रः ।

TRIPURASUNDARĪṢŌḌAŚĀKṢARĪMANTRAḤ.

Begins on fol. 18 (*a*) of the manuscript described under D. No. 2456.

Incomplete.

Similar to the work described under D. No. 7454.

Beginning :

सुस्नातः शुचिर्भूत्वा सकलसाम्राज्यसिद्ध्यर्थं(म)हाषोडशीमन्त्रजपं करिष्ये, इति संकल्प्य प्राणानायम्य ह्रीं आधारशक्तिकमलासनाय नमः इति हस्ताभ्यां रत्नकंबलाद्यासनं स्पृशेत् ।

* * * * *

अस्य श्रीमहात्रिपुरसुन्दरीमहाषोडशीमन्त्रस्य आनन्दभैरव ऋषिः। देवी गायत्री छन्दः । महाश्रीत्रिपुरसुन्दर्यवतु । प्रथमखण्डं बीजं,

द्वितीयखण्डं शक्तिः । तृतीयखण्डं कीलकं, मम सकलसाम्राज्यसिद्ध्यर्थे जपे विनियोगः । ह्रामित्यादिना सह सर्वज्ञायै अंगुष्ठाभ्यां नमः । इत्यादिना कराङ्गन्यासः —

ध्यानम्—

ध्यायेत् परशिवाङ्कस्थां—

चतुर्भुजे चन्द्रकलावतंसे— इत्यादिमानसपूजा ।

End :

ध्यानं पूजां च कृत्वा नमस्कारमुद्रया नमस्कारं कुर्यात् । इति नित्यजपविधिः ।

D. No. 17965.

Pages, 4. Lines, 6 on a page. Telugu. Injured. Extent, 23 granthas.

नवाक्षरीमन्त्रः ।

NAVĀKṢARĪMANTRAḤ.

Begins on fol. 19 (*a*) of the manuscript described under D. No. 2456.

Complete.

Similar to the work described under D. No. 6468.

Beginning :

अस्य श्रीनवाक्षरीमन्त्रस्य । मार्कण्डेय ऋषिः । अनुष्टुप् छन्दः । महालक्ष्मीः देवता । महालक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

वर्णानुक्रमयोगेन यस्यां मात्राष्टकं स्थितम् ।
वन्दे तामष्टवर्गोत्थां महासिद्ध्यष्टकेश्वरीम् ॥
. . पूर्णजकाराख्यश्रीसिद्धान्तर्निवासिनीम् ।
चतुराज्ञाकाशमाता नौमि श्रीत्रिपुरामहम् ॥

D. No. 17966.

शिवकवचः ।

ŚIVAKAVACAḤ.

Begins on fol. 9 (*a*) of the manuscript described under D. No. 8701.

Complete.

Similar to the work described under D. No. 7378.

Fol. 8 (*b*) contains some Vedic hymns regarding the origin of Varṇas.

Beginning :

इति सूत उवाच—

इत्युक्त्वा ऋषभो योगी तस्मै पार्थिवसूनवे ।
ददौ शंखं महारावं खङ्गं चारिनिषूदनम् ॥
पुनश्च भस्म संमन्त्र्य तदङ्गं परितः स्पृशन् ।
गजानां षट्सहस्रस्य द्विगुणस्य बलं ददौ ।
भस्मधारणसामर्थ्यात् शत्रुसैन्यं विजेष्यति ॥

End :

इति भद्रायुषं सम्यगनुशास्य समातृकम् ।
ताभ्यां संपूजितस्सोऽथ योगी स्वैरगतिर्ययौ ॥

Colophon :

इति श्रीमत्स्कान्दे महापुराणे ब्रह्मोत्तरखण्डे ऋषभयोगीश्वरसंवादे शिवकवचकथनं नाम द्वादशोऽध्यायः ।

D. No. 17967.

Pages, 3. Lines, 6 on a page. Telugu. Slightly injured. Extent, 7 granthas.

अमृतमृत्युञ्जयमन्त्रः ।

AMṚTAMṚTYUÑJAYAMANTRAḤ.

Begins on fol. 2 (*a*) of the work described under D. No. 6173.

Complete.

Similar to the work described under D. No. 5890.

Beginning :

अस्य श्री अमृतमृत्युञ्जयमहामन्त्रस्य कहोल ऋषिः । अमृतमृत्युञ्जयरुद्रो देवता । ओं बीजं, जुं शक्तिः, सः कीलकं, अमृतमृत्युञ्जयप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

End :

पुठितनशाशिनास्थं(नगाशिरस्थं)मौलिबद्धेन्दुरेवं
गरलमृतरसार्द्रं चन्द्रवह्नयर्कनेत्रम् ।
सकललिलतमुद्रां पाशवेदाक्षमालां
स्फटिकरचितढक्कां गौरमीशं नमामि(?) ॥

मालामन्त्रं, ओं जुं, स्वाहा, सः ओं जूं ओमिति हृदयन्यासः ।

D. No. 17968.

Pages, 4. Lines, 5, 6 on a page. Grantha. Slightly injured. Extent, 18 granthas.

आह्निकम् ।

ĀHNIKAM.

Begins on fol. 20 (*a*) of the manuscript described under D. No. 6180 wherein this work has been mentioned as Ūrdhvapuṇḍradhāraṇa-vidhi in the list of other works.

Incomplete. Wants end.

Similar to the work described under D. No. 2823.

Beginning :

नमः कृत्वा, निमज्य, आचम्य, मूलमन्त्रेण वा प्रणवेन वा, प्राणायामत्रयं कृत्वा अन्यमृद्भागमादाय दक्षिणहस्ते निधाय त्रिधाकृत्य मूलमन्त्रेण पृथक् पृथक् संप्रोक्ष्याभिमन्त्र्य एकेन दिग्बन्धनं पितृमन्त्रेण कृत्वा ।

End :

ये के चास्मत्कुले जाताः अपुत्रा गोत्रजा मृताः ।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥

आचम्य माध्यन्दिनं कृत्वा ।

D. No. 17969.

Pages, 12. Lines, 5, 6 on a page. Telugu. Slightly injured. Extent, 36 granthas.

ब्रह्मयज्ञप्रयोगः ।

BRAHMAYAJÑAPRAYOGAḤ.

Begins on fol. 17 (*a*) of the manuscript described under D. No. 220.

Complete.

Same work as that described under D. No. 3746 with slight different readings in the beginning.

Beginning :

एवंगुणविशेषणविशिष्टायां पुण्यतिथौ श्रीपरमेश्वरमुद्दिश्य श्रीपरमेश्वर-प्रीत्यर्थं ब्रह्मयज्ञेन यक्ष्ये, विद्युदसि, विद्यमे पाप्मानमृतात्सत्यमुपैमि । हस्तावविनिज्य त्रिराचामेत् । द्विः परिमृज्य सकृदुपस्पृश्य ।

D. No. 17970.

Pages, 4. Lines, 7 on a page. Telugu. Slightly injured. Extent, 20 granthas.

दर्शश्राद्धप्रयोगः ।

DARŚAŚRĀDDHAPRAYOGAḤ.

Begins on fol. 23 (*a*) of the manuscript described under D. No. 220.

Complete.

Similar to the work described under D. No. 3632.

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ शाश्वतविष्णुलोकनिवासे पितृतर्पणं करिष्ये । अस्मत्पितरं भारद्वाजसगोत्रं पट्टाभिरामेश्वरशर्माणं वसुरूपं स्वधा नमस्तर्पयामि । पितामहं भारद्वाजसगोत्रं कामेश्वरशर्माणं रुद्ररूपं स्वधा नमस्तर्पयामि । प्रपितामहं भारद्वाजसगोत्रं कामेश्वरशर्माणं आदित्यरूपं स्वधा नमस्तर्पयामि ।

End :

गुरुं श्रीवत्सगोत्रं वेङ्कटराघवाचार्यशर्माणं स्वधा नमस्तर्पयामि ।

एके चास्मत्कुलेजाता अपुत्रा गोत्रिणो मृताः ।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥

D. No. 17971.

Page, 4. Lines, 5 on a page. Telugu. Slightly injured. Extent, 14 granthas.

नदीस्तोत्रम् ।
NADĪSTOTRAM.

Begins on fol. 28 (*a*) of the manuscript described under D. No. 220, wherein this work has been mentioned as Gangastotram in the list of other works.

Complete.

This is a Stotra about Nadi (Rivers) the recital of which is said to remove sins and *redeem* one from Death.

Beginning :

त्रियम्बकजटोद्भूते गौतमस्य घनाशिनः ।
सप्तधा सागरं यान्ती गोदावरि नमोऽस्तुते ॥

पुष्यार्के जन्मनक्षत्रे व्यतीपाते दिनत्रये ।
सकृद्गोदावरीस्नानं कुलकोटिं समुद्धरेत् ।
या गतिर्योगयुक्तानां मुनीनामूर्ध्वरेतसां ।
सा गतिस्सर्वजन्तूनां गौतमीतीरवासिनां ॥

End :

पापापहारि दुरितारितरङ्गधारि
दूरप्रचारि गिरिराजगुहाविहारि ।
झङ्कारकारि हरिपादरजोविहारि
गाङ्गं पुनातु सततं शुभकारि वारि ॥
यत्र गङ्गा च विश्वेशो भवानी मणिकर्णिका ।
मरणादेव मुक्तिः स्यात्तत्र नास्त्येव संशयः ॥

D. No. 17972.

Pages, 8. Lines, 5 on a page. Telugu. Slightly injured. Extent, 27 granthas.

गायत्रीरामायणम् ।
GAYATRĪRĀMĀYAṆAM.

Begins on fol. 30 (*a*) of the manuscript described under D. No. 220.

Complete.

